कर्नाटकप्रशासनम्

# संस्कृतनन्दिनी-१

## अष्टमी कक्ष्या

## प्रथमभाषा संस्कृतम्

**(Revised)**

# 8

## प्रथमः भाग

# SAMSKRITHA NANDINI-1

**EIGHTH STANDARD**
**FIRST LANGUAGE - SANSKRIT**
**PART-1**

@KTBS
NOT TO BE REPUBLISHED

**KARNATAKA TEXTBOOK SOCIETY (R)**
**6th Cross, Malleshwaram, Bengaluru-560 003.**

# Preface

The Textbook Society, Karnataka has been engaged in producing new textbooks according to the new syllabi prepared which in turn are designed based on NCF – 2005 since June 2010. Textbooks are prepared in 11 languages; seven of them serve as the media of instruction. From standard 1 to 4 there is the EVS and $5^{th}$ to $10^{th}$ there are three core subjects namely mathematics, science and social science.

NCF – 2005 has a number of special features and they are:

- Connecting knowledge to life activities
- Learning to shift from rote methods
- Enriching the curriculum beyond textbooks
- Learning experiences for the construction of knowledge
- Making examinations flexible and integrating them with classroom experiences
- Caring concerns within the democratic policy of the country
- Make education relevant to the present and future needs.
- Softening the subject boundaries integrated knowledge and the joy of learning.
- The child is the constructor of knowledge

© KTBS NOT TO BE REPUBLISHED

The new books are produced based on three fundamental approaches namely, Constructive approach, Spiral Approach and Integrated approach.

The learner is encouraged to think, engage in activities, masters skills and competencies. The materials presented in these books are integrated with values. The new books are not examination oriented in their nature. On the other hand they help the learner in the total development of his/her personality, thus help him/her become a healthy member of a healthy society and a productive citizen of this great country India.

Language textbooks are designed to help learners master communicative competencies, excellent comprehension, meaningful expression and efficient reference skills.

Schools in Karnataka offer seven languages as media of instruction and eight as first languages and ten languages are offered as third language. The objective is to help the learners to use these languages efficiently at the communicative level. It is hoped that at least a cross section of learners achieve competencies to use these languages at the creative level.

Teachers are expected to adapt their teaching methods not to make these textbooks just feed materials for examinations, but help learners master language competencies such as communication, comprehension, expression in writing and necessary reference skills.

The Textbook Society expresses grateful thanks to the chairpersons, writers, scrutinisers, artists, staff of DIETs and CTEs and the members of the Editorial Board and printers in helping the Text Book Society in producing these textbooks.

@KTBS
NOT TO BE REPUBLISHED

**Nagendra Kumar**
Managing Director
Karnataka Textbook Society
Bengaluru, Karnataka.

**Prof. G.S. Mudambadithaya**
Co-ordinator
Curriculum Revision and
Textbook Preparation
Karnataka Textbook Society
Bengaluru, Karnataka.

# प्राक्कथनम्

इदं तु श्रुतमेवास्माभिः यत् 'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती' इति। इयं संस्कृतभाषा प्राचीनकाले व्यवहारभाषा आसीत्। भारतीयसांस्कृतिक- परम्परां रक्षन्ती क्रमशः विदेशीयानाम् आक्रमणेन शासनेन च ह्रासतां गतापि भारतीयानां संस्कृतानुरागिणां शिक्षकाणां च प्रयत्नेन पुनरपि व्यवहारपथे आनीयमाना अस्ति इत्ययं विषयः प्रमोदं जनयति। जनाः पुनरपि एतां सादरम् अपेक्षन्ते इति सन्तोषस्य विषयः।

कर्णाटकप्रशासनस्य आदेशानुसारं संस्कृतस्य अध्ययनार्थं भाषाज्ञानार्थं च अधिकः अवसरः कल्पितः अस्ति एतस्मिन् पुस्तके। तथैव पाठयोजना, मार्गदर्शकप्रश्नपत्रिका, पदकोषः च अध्यापकेभ्यः साहाय्यार्थं दत्तः अस्ति। २००५ तमवर्षस्य राष्ट्रीय पाठ्यक्रमस्य नियमानुसारं रचितमिदं पाठ्यपुस्तकं अनधीतसंस्कृतानाम् अपि सहायकं भवेत् इति अस्माकम् आशयः।

लोकेऽस्मिन् जनप्रियतां प्राप्नुवती इयं भाषा अभिवर्धताम् इत्यस्ति अस्माकम् आशयः। पाठ्यपुस्तकनिर्माणे साहाय्यं कृतवद्भ्यः सर्वेभ्यः कृतज्ञता समर्प्यते।

बेङ्गलूरु

**कृष्णप्रसादः**
अध्यक्षः
पाठ्यपुस्तकरचना समितिः

@KTBS NOT TO BE REPUBLISHED

## अध्यापकेभ्यः सूचनाः -

१. अनधीतसंस्कृतानां छात्राणां ज्ञानार्थं प्रथमः पाठः 'वर्णाः' इति प्रदत्तः। अतः अर्धमासं वा एषः पाठः पाठनीयः।

२. आरम्भे 'गणेशं भजेम' इति स्तोत्रम् अस्ति। एतत् केवलं प्रार्थनारूपेण भवति। न परीक्षानिमित्तम्।

३. अभ्यासः इति भागे ये प्रश्नाः प्रदत्ताः त एव प्रश्नाः छात्राणां कर्तव्याः। 'समुचितं पदं चिनुत' इत्यत्र कदाचित् पाठान्तर्गताः अंशाः अपि प्रश्नरूपेण भवितुम् अर्हन्ति।

४. श्लोकतात्पर्यं लिखत, पञ्चषैः वाक्यैः उत्तरं लिखत, पूरकपाठस्य प्रश्नाः, मातृभाषया भवितुमर्हति।

५. एकैकस्य पाठस्य अन्ते 'अवधेयांशः, क्रियाकलापः' इति कश्चन भागः प्रदत्तः। अयं केवलम् अभ्यासार्थम् एव। परीक्षावसरे तद्विषये प्रश्नाः नैव प्रष्टव्याः।

६. अन्ते प्रश्नपत्रिकास्वरुपं प्रदत्तम्। तत् केवलं मार्गदर्शनार्थम्। सन्दर्भवशात् परिवर्तनं कर्तुम् अर्हति।

७. गद्यपाठान्तार्गताः श्लोकाः 'श्लोकतात्पर्यं लिखत' इत्यत्र प्रश्नरूपेण नैव देयाः।

८. लेखनकलां पठनकलां च वर्धयितुम् उक्तलेखन - पाठवाचनादीनि छात्रद्वारा कारयितुं शक्यानि।

# पाठ्यपुस्तकरचनासमितिः

**अध्यक्षः**

**श्री कृष्णप्रसादः**, प्राचार्यः, श्रीरामपदवीपूर्व विद्यालयः, बण्ट्वाल, द.क.

**सदस्याः**

१) **विद्वान् वेङ्कटरमण भट्टः** - संस्कृताध्यापकः, बि.इ.एल्. प्रौढशाला, बेङ्गलूरु.

२) **विद्वान् टि. सि. अश्वत्थ कुमारः**, मुख्योपाध्यायः, श्री मनोन्मनी संस्कृतपाठशाला, बेङ्गलूरु.

३) **विद्वान् कृष्ण .वि. भट्टः**, संस्कृताध्यापकः, वासवी विद्या निकेतन प्रौढशाला, बेङ्गलूरु.

४) **विद्वान् नारायण अनन्त भट्टः**, संस्कृताध्यापकः, स.बा.प.पू.वि, नूतनकोटे, बेङ्गलूरु.

५) **विद्वान् परमेश्वर वि. भट्टः**, संस्कृताध्यापकः, स.बा.प.पू.का, हासनम्.

६) **श्री सुरेश वैद्यः, चित्रकलाशिक्षकः**, श्री वर्धमानहिन्दीप्रौढशाला, रायचूरु.

**परिशीलिका -**

**डा।। नागरत्ना हेगडे**, संस्कृतोपन्यासिका, सुराना महाविद्यालयः, बसवनगुडि, बेङ्गलूरु.

**सम्पादक :**

**डा. कोटेमने रामचन्द्र भट्टः**, निदेशकः, वेदविज्ञानशोधसंस्थानम्, बेङ्गलूरु.

**प्रमुखसंयोजकः**

**प्रो. जि.एस्. मुडम्बडित्तायः**, क.प.पु.सङ्घः, बेङ्गलूरु.

**प्रमुखमार्गदर्शकौ -**

**श्री नागेंद्र कुमार, व्यवस्थापक निर्देशकः**, क.प.पु.सङ्घःरि, बेङ्गलूरु.

**श्रीमती सि. नागमणि, उपनिदेशकः** क.प.पु.सङ्घःरि, बेङ्गलूरु.

**संयोजिका -**

**श्रीमती एस्. एन्. लीलावती**, ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः, बेङ्गलूरु.

NOT TO BE REPUBLISHED @KTBS

## About the Review of Textbooks

Honourable Chief Minister Sri Siddaramaiah who is also the Finance Minister of Karnataka, in his response to the public opinion about the New Textbooks from standard one to ten, announced, in his 2014-15 budget speech of constituting an expert-committee, to look into the matter. He also spoke of the basic expectations there in, which the Textbook experts should follow: " The Textbooks should aim at inculcating social equality, moral values, development of personality, scientific temper, critical acumen, secularism and the sense of national commitment", he said.

Later, for the production of the Textbooks from class one to tenth, the Department of Education constituted twenty seven committees and passed an order on 24-11-2014. The committees so constituted were subject and class-wise and were in accordance with the standards prescribed. Teachers who are experts in matters of subjects and syllabi were in the committees.

There were already many complaints, and analyses about the Textbooks. So, a freehand was given in the order dated 24-11-2014 to the responsible committees to examine and review text and even to prepare new text and review if necessary. Afterwards, a new order was passed on 19-9-2015 which also give freedom even to re-write the Textbooks if necessary. In the same order, it was said that the completely reviewed Textbooks could be put to force from 2017-18 instead of 2016-17.

NOT TO BE REPUBLISHED ©KTBS

Many self inspired individuals and institutions, listing out the wrong information and mistakes there in the text, had send them to the Education Minister and to the ' Textbook Society'. They were rectified. Before rectification we had exchanged ideas by arranging debates. Discussions had taken place with Primary and Secondary Education ' Teacher Associations'. Questionnaires were administered among teachers to pool up opinions. Separate meeting were held with teachers, subject inspectors and DIET Principals. Analytical opinions had been collected. To the subject experts of science, social science, mathematics and languages, textbooks were sent in advance and later meeting were held for discussions. Women associations and science related organistation were also invited for discussions. Thus, on the basis of all inputs received from various sources, the textbooks have been reviewed where ever necessary.

Another very important thing has to be shared here. We constituted three expert committees. They were constituted to make suggestions after making a critical study of the text of science, mathematics and

social science subjects of central schools (N.C.E.R.T), along with state textbooks. Thus, the state text books have been enriched basing on the critical analysis and suggestions made by the experts. The state textbooks have been guarded not to go lower in standards than the textbooks of central school. Besides, these textbooks have been examined along side with the textbooks of Andhra, Kerala, Tamil Nadu and Maharashtra states.

Another clarification has to be given here. Whatever we have done in the committees is only review, it is not the total preparation of the textbooks. Therefore, the structure of already prepared textbooks have in no way been affected or distorted. They have only been reviewed in the background of gender equality, regional representation, national integrity, equality and social harmony. While doing so, the curriculum frames of both central and state have not been transgressed. Besides, the aspirations of the constitution are incorporated carefully. Further, the reviews of the committees were once given to higher expert committees for examination and their opinions have been effected into the textbooks.

Finally, we express our grateful thanks to those who strived in all those 27 committees with complete dedication and also to those who served in higher committees. At the same time, we thank all the supervising officers of the 'Textbook Society' who sincerely worked hard in forming the committees and managed to see the task reach it's logical completion. We thank all the members of the staff who co-operated in this venture. Our thanks are also due to the subject experts and to the associations who gave valuable suggestions.

© KTBS NOT TO BE REPUBLISHED

**Sri M. P. Madegowda**
Managing Director
Karnataka Textbook Society
Bengaluru.

**Prof. Baraguru Ramachandrappa**
Chairman-in-Chief
Textbook Review Committee
Bengaluru.

## परिष्करणसमितिः

१. **प्रो. बरगूरु रामचन्द्रप्पः**, सर्वाध्यक्षः, राज्यपठ्यपुस्तकपरिष्करणसमितिः, बेंगळूरु.

२. **प्रो. शिवराजप्पः**, अध्यक्षः, पठ्यपुस्तकपरिष्करणसमितिः,प्राध्यापकः, महाराज कालेजु, मैसूरु विश्वविद्यालयः, मैसूरु.

सदस्याः

१. **डा. नंजुण्डय्यः**, प्रांशुपालः श्री कालभैरवेश्वर संस्कृतवेदआगमशिक्षण महाविद्यालय. श्री आदि चुञ्चनगिरि क्षेत्रम्, नागमंगल ताल्लूकु.

२. **श्री एच्.एम्.सुधीरः**, संस्कृत शिक्षकः, स.बा.प.पू. कालेज्, अरकलगूडु, हासन मण्डलम्.

३. **श्री गजानन नारायण भट्टः**, संस्कृत शिक्षकः, इन्दिरा प्रियदर्शिनि बालिका प्रौढशाला, जे.पि. नगर बेंगळूरु.

४. **डा.राघवेन्द्र भट्टः क्यादगि**, संस्कृत शिक्षकः, सर्वकारीय प्रौढशाला, सारक्कि, बेंगलूरु.

५. **श्री हजरत् अली. यु**,उपन्यासकः, ललित कला विभाग. तुमकूरु विश्व विद्यालय, तुमकूरु.

@KTBS NOT TO BE REPUBLISHED

## परिष्करणोन्नतसमितिः

१. **डा. एच्.वि.वेणुगोपालः**, निवृत्त प्रांशुपालः संस्कृत प्राध्यापकः, न्याषनल् कालेज् बसवनगुडि बेंगळूरु।

२. **डा. जे.श्रीनिवासमूर्तिः**, निवृत्त प्रांशुपालः एं.इ.एस्.कालेज्, मल्लेश्वरं, बेङ्गलूरु।

**प्रमुखमार्गदर्शकौ-**

**श्री एम्. पि. मादेगौड**, व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

**श्रीमती एम्. डि. उषा**, उपनिर्देशिका, क.प.पु. सङ्घः (रि) बेङ्गलूरु।

**संयोजिका**

**श्रीमती सुमा बि.के**, ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

# Foreword

In the pursuit of fostering a healthier and more balanced educational journey, we present this initiative aimed at reducing the weight of school bags. Education is the cornerstone of progress and it is our responsibility to ensure that the pursuit of knowledge is accompanied by the wellbeing of students.

As a first step, to reduce the burden of heavy bags, the School Education Department, Government of Karnataka has decided to print semester-wise textbooks in 2 parts i.e, Summative Assessment 1 and 2. This intervention will help significantly in reducing the weight of school bags.

This endeavour signifies a paradigm shift, acknowledging the strain posed by bulky bags on students.

@KTBS
NOT TO BE REPUBLISHED

Manjushree. N, IAS
Managing Director
Karnataka Textbook Society (R)

# पाठानुक्रमणिका

C9E9P6


| क्र.सं. | पाठाः | | पृष्ठसंख्या |
|---|---|---|---|
| | **गणेशं भजेम** | | |
| १. | प्रथमः पाठः | वर्णाः | २ - १० |
| २. | द्वितीयः पाठः | दिनचर्या संख्या च | ११ - १८ |
| ३. | तृतीयः पाठः | सहवासः | १९ - २५ |
| ४. | चतुर्थः पाठः | नीतिबोधः (कण्ठपाठः करणीयः) | २६ - ३३ |
| ५. | पञ्चमः पाठः | सुबन्ताः | ३४ - ४५ |
| ६. | षष्ठः पाठः | आरोग्यभाग्यम् | ४६ - ५३ |
| ७. | सप्तमः पाठः | जीवनसाफल्यम् | ५४ - ५८ |
| ८. | अष्टमः पाठः | पत्रलेखनम् | ५९ - ६३ |
| ९. | नवमः पाठः | तिङन्ताः | ६४ - ७३ |
| १०. | दाशमः पाठः | प्रबन्धः | ७४ - ७५ |
| ११. | एकादशः पाठः | अनुवादः | ७६ |
| १२. | द्वादशः पाठः | चतुरः कालिदासः | ७७ - ८४ |

| | | |
|---|---|---|
| | **पूरकपाठौ** | |
| १. | भिक्षुकस्य स्वप्नः | ८५ - ८६ |
| २. | अक्कमहादेवी | ८७ - ८८ |
| | **परिशिष्टम्** | |
| १. | वाक्यरचनाकौशलम् | २९ - ९१ |
| २. | पदकोशः | ९२ - ९८ |
| ३. | प्रश्नपत्रिकास्वरूपम् | ९९ |
| ४. | आकरग्रन्थाः | १०० |
| ५. | पाठयोजना | १०१ - १०२ |


NOT TO BE REPUBLISHED @KTBS

# गणेशं भजेम



अजं निर्विकल्पं निराकारमेकं
निरानन्दमानन्दमद्वैतपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं
परब्रह्मरूपं गणेशं भजेम ।।१ ।।

गुणातीतमानं चिदानन्दरूपं
चिदाभासगं सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं
परब्रह्मरूपं गणेशं भजेम ।।२ ।।

जगत्कारणं कारणज्ञानरूपं
सुरादिं सुखादिं गुणेशं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं ।
परब्रह्मरूपं गणेशं भजेम ।।३ ।।

©KTBS NOT TO BE REPUBLISHED

I6X1W6

## प्रथमः पाठः

# वर्णाः

संस्कृतभाषायां ४८ (अष्टचत्वारिंशत्) वर्णाः सन्ति। तेषु त्रयः प्रकाराः-

१. स्वराः २. अयोगवाहौ ३. व्यञ्जनानि च

वर्णाः

- स्वराः - १३
- अयोगवाहौ - २
- व्यञ्जनानि - ३३

स्वतन्त्रतया उच्चार्यमाणाः वर्णाः 'स्वराः'।

ह्रस्वस्वराः - ०५

अ इ उ ऋ ऌ

दीर्घस्वराः - ०८

आ ई ऊ ॠ ए ऐ ओ औ

अयोगवाहौ - ०२

- अनुस्वारः अं ं
- विसर्गः अः ः

@KTBS NOT TO BE REPUBLISHED

# व्यञ्जनानि

अर्धमात्राकालेन उच्चार्यमाणः वर्णः व्यञ्जनम् । अत्र प्रधानतया द्वौ विभागौ स्तः । यथा -

## वर्गीयव्यञ्जनानि - २५

### कर्कशव्यञ्जनानि

क् ख्
च् छ्
ट् ठ्
त् थ्
प् फ्

### मृदुव्यञ्जनानि

ग् घ् ङ्
ज् झ् ञ्
ड् ढ् ण्
द् ध् न्
ब् भ् म्

@KTBS
NOT TO BE REPUBLISHED

## अवर्गीयव्यञ्जनानि - ०८

श् ष् स्     य् र् ल् व् ह्

## अनुनासिकानि - ०५

ङ् ञ् ण् न् म्

## अल्पप्राणव्यञ्जनानि

| | | | |
|---|---|---|---|
| क् | ग् | ङ् | य् |
| च् | ज् | ञ् | र् |
| ट् | ड् | ण् | ल् |
| त् | द् | न् | व् |
| प् | ब् | म् | |

यस्य वर्णस्य उच्चारणे अल्पप्राणः (वायुः) पर्याप्तः भवति सः अल्पप्राणः। वर्गाणां प्रथम-तृतीय - पञ्चमाक्षराणि। अवर्गीयाणि आद्यानि चत्वारि अक्षराणि च।

## महाप्राणव्यञ्जनानि

| | | |
|---|---|---|
| ख् | घ् | श् |
| छ् | झ् | ष् |
| ठ् | ढ् | स् |
| थ् | ध् | ह् |
| फ् | भ् | |

यस्य वर्णस्य उच्चारणे अधिकप्राणः (वायुः) अपेक्ष्यते सः महाप्राणः। वर्गाणां द्वितीय-चतुर्थ - अक्षराणि, अवर्गीयाणि अन्तिमानि चत्वारि अक्षराणि च।

©KTBS NOT TO BE REPUBLISHED

## माहेश्वरसूत्राणि

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥**
**येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।**
**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥**

१. अ, इ, उ, ण्
२. ऋ, लृ, क्
३. ए, ओ, ङ्
४. ऐ, औ, च्
५. ह, य, व, र, ट्
६. लण्
७. ञ, म, ङ, ण, न, म्
८. झ, भ, ञ्
९. घ, ढ, ध, ष्
१०. ज, ब, ग, ड, द, श्
११. ख, फ, छ, ठ, थ, च, ट, त, व्
१२. क, प, य्
१३. श, ष, स, र्
१४. ह, ल्

महेश्वरात् आगतानि एतानि माहेश्वरसूत्राणि। एतैः सूत्रैः अच्, हल्, अक्, इक्, यण् इत्यादयः प्रत्याहाराः क्रियन्ते।

उदाः अक् प्रत्याहारे अ,इ,उ,ण्, ऋ,लृ, क् अक्षराणि भवन्ति।

## गुणिताक्षराणि

एकेन व्यञ्जनेन सह एकः स्वरः सङ्गच्छते चेत् तत् गुणिताक्षरं भवति।

| चिह्नम् | - | ा | ि | ी | ु | ू | ृ | ॄ | लृ | े | ै | ो | ौ | ं | ः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| व्यञ्जनम् | क् | क् | क् | क् | क् | क् | क् | क् | क् | क् | क् | क् | क् | क् | क् |
| स्वरः | अ | आ | इ | ई | उ | ऊ | ऋ | ॠ | लृ | ए | ऐ | ओ | औ | अं | अः |
| प्रयोगः गुणिताक्षरम् | क | का | कि | की | कु | कू | कृ | कॄ | क्लृ | के | कै | को | कौ | कं | कः |

## संयुक्तवर्णाः

अनेकव्यञ्जनसंयोगात् संयुक्ताक्षरं भवति।

**व्यञ्जनम् + व्यञ्जनम् = संयुक्तवर्णः**

**यथा क् + क् = क्क् - कुक्कुटः**

आर्यः = र् + य् + अः = र्य

न्यायः =न् + य + आ = न्या

विघ्नः = घ् + न् + अ = घ्नः

अष्ट =ष् + ट् + अ = ष्ट

श्लोकः= श् + ल् + ओ = श्लो

ज्ञानम्- ज् + ञ् + आ = ज्ञा

द्रौपदी = द् + र् + औ = द्रौ

गायत्री = त् + र् + ई = त्री

इन्द्रः = न् + द् + र् + अः = न्द्रः

उष्ट्रः= ष् + ट् + र् + अः = ष्ट्रः

©KTBS NOT TO BE REPUBLISHED

# अभ्यासः

## १. एकवाक्येन उत्तरं लिखत।

१. संस्कृतभाषायां कति वर्णाः सन्ति ?

२. स्वराः के ?

३. अनुनासिकानि कानि ?

४. वर्गीयव्यञ्जनानि कति सन्ति ?

५. ह्रस्वस्वराः दीर्घस्वराः च के ?

६. गुणिताक्षरं नाम किम् ?

## २. वर्णानां संयोजनं कुरुत।

१. र् + आ + म् + आ + य् + अ + ण् + अ + म् = ............

२. व् + य् + अ + ञ् + ज् + अ + न् + आ + न् + इ = ............

३. अ + य् + ओ + ग् + अ + व् + आ + ह् + औ = ............

४. अ + व् + अ + र् + ग् + ई + य् + अः = ............

५. अ + क् + ष् + अ + र् + अ + म् = ............

## ३. अल्पप्राण-महाप्राणाक्षराणि पृथक् कुरुत।

ध - ग - ज - ख - ट - थ

क - फ - झ - च - य - स

| | | | | | | |
|---|---|---|---|---|---|---|
| अल्पप्राणाः | | | | | | |
| महाप्राणाः | | | | | | |

@KTBS
NOT TO BE REPUBLISHED

४. **वर्णान् पृथक् कृत्वा लिखत।**

१. बालकः = ..........................................

२. भवनम् = ..........................................

३. औषधम् = ..........................................

४. शकुन्तला = ..........................................

५. महाभारतम् = ..........................................

६. वासवदत्ता = ..........................................

## अवधेयांशः

## वर्णानाम् उत्पत्तिस्थानम्

| वर्णस्य उत्पत्तिस्थानम् | | उच्चारिताः वर्णाः | | | |
|---|---|---|---|---|---|
| कण्ठः | | अ-आ | क्-ख्-ग्-घ्-ङ् | ह् | : |
| तालु | | इ-ई | च्-छ्-ज्-झ्-ञ् | य् | श् |
| मूर्धा | | ऋ-ॠ | ट्-ठ्-ड्-ढ्-ण् | र् | ष् |
| दन्ताः | | ऌ | त्-थ्-द्-ध्-न् | ल् | स् |
| ओष्ठौ | | उ-ऊ | प्-फ्-ब्-भ्-म् | - | - |
| कण्ठ-ओष्ठौ | | ओ-औ | - | - | - |
| कण्ठ-तालु | | ए-ऐ | - | - | - |
| दन्त-ओष्ठम् | | - | - | व् | - |

@KTBS NOT TO BE REPUBLISHED

# क्रियाकलापः

## I. उच्चैः पठत

| | | | |
|---|---|---|---|
| कटः | खरः | गजः | घटः |
| चरः | छदः | जडः | झषः |
| तटः | नरः | पटः | बकः |
| मठः | यमः | रथः | लवः |
| शशः | सरः | हयः | जनः |
| आतपः | अचलः | ईशः | ऊषरः |
| ऋषभः | ओदनः | एडकः | औषधम् |
| जलजम् | गगनम् | भुवनम् | फलम् |
| नयनम् | भवनम् | वदनम् | लवणम् |
| कमलम् | लोचनम् | नगरम् | सदनम् |

@KTBS NOT TO BE REPUBLISHED

## II. क - च - ट - त - प वर्गीयवर्णान् लिखत।

| | | | | | |
|---|---|---|---|---|---|
| क | | | | | |
| च | | | | | |
| ट | | | | | |
| त | | | | | |
| प | | | | | |

**व्यञ्जनम् + व्यञ्जनम् = संयुक्तवर्णः**

**यथा-क् + क् + अ = क्क = कुक्कुरः**

## III. उदाहरणानुसारं त्रिवारं लिखत

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| क् | + | क | = | क्क | - | कुक्कुरः | कुक्कुरः | कुक्कुरः | कुक्कुरः |
| र् | + | क | = | र्क | - | अर्कः | ......... | ......... | ......... |
| त् | + | ख | = | त्ख | - | उत्खननम् | ......... | ......... | ......... |
| ड् | + | ग | = | ड्ग | - | खड्गः | ......... | ......... | ......... |
| ङ् | + | घ | = | ङ्घ | - | सङ्घः | ......... | ......... | ......... |
| ङ् | + | क | = | ङ्क | - | अङ्कः | ......... | ......... | ......... |
| च् | + | च | = | च्च | - | उच्चैः | ......... | ......... | ......... |
| च् | + | छ | = | च्छ | - | गुच्छः | ......... | ......... | ......... |
| ज् | + | ज | = | ज्ज | - | सज्जनः | ......... | ......... | ......... |
| र् | + | झ | = | र्झ | - | निर्झरः | ......... | ......... | ......... |
| ज् | + | ञ | = | ज्ञ | - | ज्ञानम् | ......... | ......... | ......... |
| ण् | + | ट | = | ण्ट | - | घण्टा | ......... | ......... | ......... |
| ष् | + | ठ | = | ष्ठ | - | षष्ठः | ......... | ......... | ......... |
| ड् | + | ड | = | ड्ड | - | उड्डयनम् | ......... | ......... | ......... |
| ष् | + | ण | = | ष्ण | - | उष्णम् | ......... | ......... | ......... |
| त् | + | त | = | त्त | - | उत्तमः | ......... | ......... | ......... |
| त् | + | थ | = | त्थ | - | उत्थानम् | ......... | ......... | ......... |
| न् | + | द | = | न्द | - | चन्दनम् | ......... | ......... | ......... |
| द् | + | ध | = | द्ध | - | योद्धा | ......... | ......... | ......... |
| त् | + | न | = | त्न | - | रत्नम् | ......... | ......... | ......... |
| त् | + | प | = | त्प | - | उत्पलम् | ......... | ......... | ......... |

@KTBS NOT TO BE REPUBLISHED

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| र् | + | प | = | र्प | - | सर्पः | ......... | ......... | ......... |
| म् | + | फ | = | म्फ | - | गुम्फः | ......... | ......... | ......... |
| र् | + | ब | = | र्ब | - | दुर्बलः | ......... | ......... | ......... |
| र् | + | भ | = | र्भ | - | अर्भकः | ......... | ......... | ......... |
| द् | + | म | = | द्म | - | पद्मम् | ......... | ......... | ......... |
| ग् | + | य | = | ग्य | - | भाग्यम् | ......... | ......... | ......... |
| ज् | + | र | = | ज्र | - | वज्रम् | ......... | ......... | ......... |
| म् | + | र | = | म्र | - | आम्रम् | ......... | ......... | ......... |
| क् | + | ल | = | क्ल | - | शुक्लः | ......... | ......... | ......... |
| ह् | + | ल | = | ह्ल | - | आह्लादः | ......... | ......... | ......... |
| त् | + | व | = | त्व | - | सत्वरम् | ......... | ......... | ......... |
| श् | + | व | = | श्व | - | अश्वः | ......... | ......... | ......... |
| क् | + | ष | = | क्ष | - | रक्षा | ......... | ......... | ......... |
| र् | + | ष | = | र्ष | - | हर्षः | ......... | ......... | ......... |
| त् | + | स | = | त्स | - | उत्साहः | ......... | ......... | ......... |
| र् | + | ह | = | र्ह | - | अर्हता | ......... | ......... | ......... |

@KTBS NOT TO BE REPUBLISHED

**पठत**

**यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो**
**बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।**
**अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः**
**सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो विभुः॥**

*****

H2K5R5

समयः

## द्वितीयः पाठः

# दिनचर्या संख्या च



मम नाम शङ्करः। अहं प्रातः **षड्वादने** उत्तिष्ठामि।



अनन्तरं **सपादषड्वादने** दन्तधावनं करोमि। मुखप्रक्षालनं करोमि। ततः सूर्यनमस्कारं करोमि।

**सार्धषड्वादने** स्नानं करोमि। अनन्तरं पाठं पठामि। गृहकार्यं करोमि।





**पञ्च-ऊन-नववादने** अल्पाहारं स्वीकरोमि।



**पञ्चाधिकनववादने** विद्यालयं गच्छामि। तत्र पाठान् पठामि।

मध्याह्ने **सार्धद्वादशवादने** भोजनं करोमि। सायङ्काले **सार्धचतुर्वादने** क्रीडाङ्गणे क्रीडामि। **सपादषड्- वादने** विद्यालयतः गृहम् आगच्छामि।



@KTBS NOT TO BE REPUBLISHED

रात्रौ **सपादसप्तवादने** भोजनं करोमि। अनन्तरं **पञ्चोनदशवादनपर्यन्तं** पाठान् पठामि। **दशवादने** शयनं करोमि।




## संख्याः

| | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| १. | एकः | एका | एकम् |
| २. | द्वौ | द्वे | द्वे |
| ३. | त्रयः | तिस्रः | त्रीणि |
| ४. | चत्वारः | चतस्रः | चत्वारि |

५. पञ्च
६. षट्
७. सप्त
८. अष्ट
९. नव
१०. दश
११. एकादश
१२. द्वादश
१३. त्रयोदश
१४. चतुर्दश
१५. पञ्चदश
१६. षोडश

१७. सप्तदश
१८. अष्टादश
१९. नवदश
२०. विंशतिः
२१. एकविंशतिः
२२. द्वाविंशतिः
२३. त्रयोविंशतिः
२४. चतुर्विंशतिः
२५. पञ्चविंशतिः
२६. षड्विंशतिः
२७. सप्तविंशतिः
२८. अष्टाविंशतिः

२९. एकोनत्रिंशत्
३०. त्रिंशत्
३१. एकत्रिंशत्
३२. द्वात्रिंशत्
३३. त्रयस्त्रिंशत्
३४. चतुस्त्रिंशत्
३५. पञ्चत्रिंशत्
३६. षट्त्रिंशत्
३७. सप्तत्रिंशत्
३८. अष्टात्रिंशत्
३९. एकोनचत्वारिंशत्
४०. चत्वारिंशत्

@KTBS NOT TO BE REPUBLISHED

| | | | | | |
|---|---|---|---|---|---|
| ४१. | एकचत्वारिंशत् | ६१. | एकषष्टिः | ८१. | एकाशीतिः |
| ४२. | द्विचत्वारिंशत् | ६२. | द्विषष्टिः | ८२. | द्व्यशीतिः |
| ४३. | त्रिचत्वारिंशत् | ६३. | त्रिषष्टिः | ८३. | त्र्यशीतिः |
| ४४. | चतुश्चत्वारिंशत् | ६४. | चतुष्षष्टिः | ८४. | चतुरशीतिः |
| ४५. | पञ्चचत्वारिंशत् | ६५. | पञ्चषष्टिः | ८५. | पञ्चाशीतिः |
| ४६. | षट्चत्वारिंशत् | ६६. | षट्षष्टिः | ८६. | षडशीतिः |
| ४७. | सप्तचत्वारिंशत् | ६७. | सप्तषष्टिः | ८७. | सप्ताशीतिः |
| ४८. | अष्टचत्वारिंशत् | ६८. | अष्टषष्टिः | ८८. | अष्टाशीतिः |
| ४९. | एकोनपञ्चाशत् | ६९. | नवषष्टिः | ८९. | नवाशीतिः |
| ५०. | पञ्चाशत् | ७०. | सप्ततिः | ९०. | नवतिः |
| ५१ | एकपञ्चाशत् | ७१. | एकसप्ततिः | ९१. | एकनवतिः |
| ५२ | द्विपञ्चाशत् | ७२. | द्विसप्ततिः | ९२. | द्विनवतिः |
| ५३ | त्रिपञ्चाशत् | ७३. | त्रिसप्ततिः | ९३. | त्रिनवतिः |
| ५४ | चतुष्पञ्चाशत् | ७४. | चतुस्सप्ततिः | ९४. | चतुर्नवतिः |
| ५५ | पञ्चपञ्चाशत् | ७५. | पञ्चसप्ततिः | ९५. | पञ्चनवतिः |
| ५६ | षट्पञ्चाशत् | ७६. | षट्सप्ततिः | ९६. | षण्णवतिः |
| ५७ | सप्तपञ्चाशत् | ७७. | सप्तसप्ततिः | ९७. | सप्तनवतिः |
| ५८ | अष्टपञ्चाशत् | ७८. | अष्टसप्ततिः | ९८. | अष्टनवतिः |
| ५९ | नवपञ्चाशत् | ७९. | नवसप्ततिः | ९९. | नवनवतिः |
| ६० | षष्टिः | ८०. | अशीतिः | १००. | शतम् |

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. उदाहरणानुसारं समयम् अक्षरैः निर्दिशत।**

**उदा - १०.१५** - सपाददशवादनम्

१. ११.३० = ____________

२. १.५५ = ____________

३. २.१० = ____________

४. ४.५० = ____________

५. ५.०५ = ____________

६. ७.३० = ____________

**२. उदाहरणानुसारं वाक्यानि रचयत।**

| | | |
|---|---|---|
| **उदा- १** | सः | ५-३० उत्तिष्ठति/उत्तिष्ठसि/उत्तिष्ठामि |
| २ | सा | ६-४५ स्नानं करोमि/करोति/कुर्वन्ति |
| ३ | अहम् | ७-१५ गृहकार्यं करोति/करोमि/कुर्मः |
| ४ | त्वम् | ८-३० अल्पाहारं स्वीकरोति/स्वीकरोमि/स्वीकरोषि |
| ५ | भवान् | ९-१५ विद्यालयं गच्छति/गच्छामि/गच्छन्ति |
| ६ | भवती | १२-४५ भोजनं करोति/करोमि/कुर्मः |
| ७ | वयम् | ४-१५ खेलति/खेलामि/खेलामः |
| ८ | बालाः | ६-३० गृहम् आगच्छन्ति/आगच्छामि/गच्छति |
| ९ | बालिकाः | १०-०० शयनं करोति/कुर्मः/कुर्वन्ति |

©KTBS NOT TO BE REPUBLISHED

उदा - १. सः सार्धपञ्चवादने उत्तिष्ठति।

२. सा पादोनसप्तवादने स्नानं करोति।

३. अहम् ........... ........... ।

४. त्वम् ........... ...........।

५. भवान् ........... ...........।

६. भवती ........... ...........।

७. वयम् ........... ...........।

८. बालाः ........... ...........।

९. बालिकाः ........... ...........।

**३. रिक्तस्थानानि पूरयत।**

२) ब्रह्मा ............ । २) ............ नेत्रे।

३) दशरथस्य .......... भार्याः। ४) दशरथस्य ........ पुत्राः।

५) ............ विभक्तयः। ६) ............ दिक्पालकाः।

(अष्ट - द्वे - तिस्रः - सप्त - एकः - चत्वारः)

**४. संयोजयत।**

| **अ** | **आ** | **उत्तराणि** |
|---|---|---|
| १. सप्तविंशतिः | वासराः | १............ |
| २. पञ्चदश | राशयः | २............ |
| ३. द्वादश | नक्षत्राणि | ३............ |
| ४. सप्त | तिथयः | ४............ |

@KTBS NOT TO BE REPUBLISHED

५. **पदानि अन्विष्य लिखत।**

| | | | |
|---|---|---|---|
| १) | | - | बालकौ |
| २) | | - | विद्यालयः |
| ३) | | - | मार्गाः |
| ४) | | - | फलानि |

*****

## अवधेयांशः

**वासरः**

१. आदित्यवासरः - भानुवासरः

२. सोमवासरः -इन्दुवासरः

३. मङ्गलवासरः -कुजवासरः

४. बुधवासरः - सौम्यवासरः

५. गुरुवासरः - बृहस्पतिवासरः

६. शुक्रवासरः - भार्गववासरः

७. शनिवासरः - स्थिरवासरः

@KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

**I. मञ्जूषातः समीचीनं पदं चित्वा रिक्तस्थानं पूरयत**

| पाठं, कार्यम् प्रातः, सार्धचतुर्वादने, नव, |
|---|

१. कावेरी ................ उपाहारं स्वीकरोति ।

२. छात्राः शालातः ................ गृहम् आगच्छन्ति ।

३. बालकौ पञ्चवादने ................ पठतः ।

४. प्रातः ................ वादने शालां गच्छामः ।

५. वयं श्रद्धया ................ कुर्मः ।

**II.**

| प्रपरह्यः | परह्यः | ह्यः | अद्य | श्वः | परश्वः | प्रपरश्वः |
|---|---|---|---|---|---|---|

१. श्वः मङ्गलवासरः।

२. परश्वः बुधवासरः।

३. प्रपरश्वः गुरुवासरः।

**अद्य सोमवासरः।**

४. ह्यः भानुवासरः ।

५. परह्यः शनिवासरः ।

६. प्रपरह्यः शुक्रवासरः।

**रिक्तस्थानं पूरयत**

१. अद्य गुरु वासरः ____________।

२. ह्यः ____________।

३. परह्यः ____________।

४. प्रपरह्यः ____________।

५. श्वः ____________।

६. परश्वः ____________।

७. प्रपरश्वः ____________।

@KTBS NOT TO BE REPUBLISHED

**III. सम्यक् योजयत।**

| द्वादशमासाः | | षट् ऋतवः |
|---|---|---|
| १. चैत्रः<br>२. वैशाखः | ____________ | शिशिरः |
| ३. ज्येष्ठः<br>४. आषाढः | ____________ | हेमन्तः |
| ५. श्रावणः<br>६. भाद्रपदः | ____________ | शरत् |
| ७. आश्वयुजः<br>८. कार्त्तिकः | ____________ | वर्षा |

९. मार्गशिरः } ________________ ग्रीष्मः
१०. पुष्यः

११. माघः } ________________ वसन्तः
१२. फाल्गुणः

**IV. उदाहरणानुगुणं रिक्तस्थानानि पूरयत।**

| | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| उदा :१. | चत्वारः - बालकाः | चतस्रः - बालिकाः | चत्वारि - फलानि |
| २. | ........ स्यूताः | ........ लेखन्यः | ........ चित्राणि |
| ३. | ........ छात्राः | ........ लताः | ........ पर्णानि |
| ४. | ........ ग्रन्थाः | ........ मालाः | ........ भवनानि |
| ५. | ........ दीपाः | ........ अध्यापिकाः | ........ गृहाणि |
| ६. | ........ वृक्षाः | ........ शाखाः | ........ उद्यानानि |

@KTBS NOT TO BE REPUBLISHED

**V. चित्रं दृष्ट्वा रिक्तस्थानं पूरयत -**









लट्लकारः

Y2P3S1

## तृतीयः पाठः

# सहवासः

कश्चित् चोरः **अस्ति**। चौर्यम् एव तस्य कार्यम्। कदाचित् सः चौर्यार्थं राजभवनं **प्रविशति**। महाराज्ञी महाराजः च परस्परं वार्तालापं **कुरुतः**।

राज्ञी - "महाराज ! भवतः पुत्री विवाहवयस्का इति **स्मरति** किल?"

राजा - "प्रिये ! **स्मरामि** तत्। सर्वम् अपि काले **सम्भवति**। किमर्थम् इदानीं त्वरा" ?

राज्ञी - "इदानीं युक्तः कालः एव। तदर्थं शीघ्रं वरान्वेषणं करोतु"।

राजा - "भद्रे, चिन्ता किमर्थम्? आवयोः पुत्री सुन्दरी **अस्ति**। अतः तस्याः विवाहविषये चिन्ता मास्तु"।

राज्ञी - "किं तावत् सरलः **अस्ति** विवाहः ? तादृशाः वराः कुत्र **सन्ति**?"

राजा - "नगरस्य समीपे ऋष्याश्रमः **अस्ति** किल! तत्र योग्याः ऋषिकुमाराः **निवसन्ति**। ते विद्यावन्तः धीमन्तः च। तत्र गत्वा पुत्र्याः निमित्तं योग्यवरस्य अन्वेषणं **करोमि**।"

राज्ञी - "तत्र सुन्दराः वराः **सन्ति** वा ? अहम् अपि द्रष्टुम् **इच्छामि**। कदा **गच्छाम**?"

राजा - "इदानीं मम राजकार्याणि **सन्ति**। कतिपयदिनानन्तरं **गच्छाम**"।

चोरः एतत् सर्वं **शृणोति**। सः **चिन्तयति** - "अहम् इदानीं चौर्यं न **करोमि**। ऋष्याश्रमं **गच्छामि**। ऋषिकुमारः इव **आचरामि**। राजा तत्र **आगच्छति**। मां **पश्यति**। मम पुत्र्याः एषः एव वरः भवतु इति **अङ्गीकरोति**। भविष्यं को वा **जानाति**? इदानीं चौर्येण किञ्चित् धनं **प्राप्नोमि**। राजपुत्र्याः पतिः **भवामि** चेत्, समग्रं राज्यम् एव **प्राप्नोमि**" इति।

@KTBS NOT TO BE REPUBLISHED

चोरः ऋष्याश्रमं **गच्छति**। ऋषिकुमारः इव **व्यवहरति**। प्रतिदिनं प्रातःकाले शीघ्रम् **उत्तिष्ठति**। नदीजलेन स्नानं **करोति**। सर्वदा देवध्यानं **करोति**। पूजाम् अध्ययनं योगाभ्यासं च **करोति** । परिणामात् चोरस्य मनः ऋषिजीवने आसक्तम् ।

पञ्चदशदिनानाम् अनन्तरं राजा ऋष्याश्रमं **गच्छति**। सर्वान् अपि ऋषिकुमारान् **परिशीलयति**। चोरं **पश्यति**। 'एषः एव वरः भवतु' इति मनसा निर्णयं **करोति** । चोरसमीपं गत्वा **प्रार्थयति** - ''आर्य। कृपया भवान् मम पुत्र्याः पाणिग्रहणं करोतु'' इति।

तदानीं चोरः **वदति** - ''पूर्वम् एतदर्थम् एव मया प्रयत्नः कृतः। किन्तु अत्र आश्रमे ऋषिकुमाराणां सहवासेन अहं विवेकं प्राप्तवान्। अतः इदानीम् अहं भोगं न **इच्छामि**'' इति।

एवं सज्जनसहवासेन चोरः अपि ऋषिकुमारः इव निःस्पृहः संवृत्तः।



© KTBS Not to be republished

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत।**

१. चोरः चौर्यार्थं कुत्र प्रविशति ?
२. ऋष्याश्रमे कः ऋषिकुमारः इव आचरति?
३. राजा कान् परिशीलयति ?
४. चोरः ऋषिकुमाराणां सहवासेन किं प्राप्तवान्?

**२. रिक्तस्थानानि पूरयत।**

१. पुत्र्याः निमित्तं ............. अन्वेषणं करोमि।
२. इदानीं मम ............. कार्याणि सन्ति।
३. मम पुत्र्याः एषः एव ............. भवतु।
४. अतः इदानीम् अहं ............. न इच्छामि।

**३. विरुद्धार्थकपदानि लिखत।**

१. अस्ति  २. शीघ्रम्  ३. सरलम्  ४. योग्याः

**४. समानार्थकपदानि लिखत।**

१. चोरः  २. भवनम्  ३. कालः  ४. शीघ्रम्

**५. संयोजयत।**

| अ | आ |
|---|---|
| १. राजभवनम् | करोति |
| २. वार्तालापम् | प्रविशति |
| ३. धनम् | परिशीलयति |
| ४. ऋषिकुमारान् | प्राप्नोति |

@KTBS NOT TO BE REPUBLISHED

६. **प्रश्ननिर्माणं कुरुत। (रेखाङ्कितपदानि अवलम्ब्य)**

१. चौर्यकरणं चोरस्य कार्यम्।

२. आश्रमे योग्याः ऋषिकुमाराः निवसन्ति।

३. चोरः नदीजलेन स्नानं करोति।

४. चोरः ऋषिकुमाराणां सहवासेन विवेकं प्राप्तवान्।

७. **वाक्यशुद्धिं कुरुत।**

१. चोरः चौर्यार्थं राजभवनं प्रविशन्ति।

२. तादृशाः वरः कुत्र सन्ति।

३. अहम् अपि द्रष्टुम् इच्छति।

४. महाराजः सर्वान् अपि ऋषिकुमारः परिशीलयति।

८. **अन्यलिङ्गपदं लिखत।**

१. सुन्दरः    २. कुमारः    ३. पुत्री    ४. सञ्जातः

९. **आम् / न इति लिखत।**

१. चोरः चौर्यार्थं दरिद्रगृहं प्रविशति।

२. पुत्र्याः निमित्तं योग्यवरस्य अन्वेषणं करोमि।

३. चोरः ऋषिकुमारः इव न आचरति।

४. ऋषिकुमाराणां सहवासेन चोरः विवेकं प्राप्तवान्।

१०. **पञ्चषैः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा लिखत।**

१. चोरस्य मनसः परिवर्तनं कथम् अभवत्?

@KTBS
NOT TO BE REPUBLISHED

# अवधेयांशः

## सप्त-ककाराः




* भवतः नाम किम् ?
  मम नाम.....।
* पाठशाला कुत्र अस्ति ?
  पाठशाला ग्रामे अस्ति ।
* यन्त्रागारे कति कर्मकराः सन्ति ?
  यन्त्रागारे विंशतिः कर्मकराः सन्ति ।
* शिशुः कदा शयनात् उत्तिष्ठति ?
  शिशुः सप्तवादने शयनात् उत्तिष्ठति।
* आम्रफलं कुतः पतति ?
  आम्रफलं वृक्षात् पतति ।
* बालिका कथं गायति ?
  बालिका मधुरं गायति ।
* अम्बा किमर्थं विपणिं गच्छति ?
  अम्बा नूतनवस्त्राणि क्रेतुं विपणिं गच्छति ।

@KTBS NOT TO BE REPUBLISHED

# क्रियाकलापः

## वर्तमानकालः (लट्लकारः)

अत्र तु क्रिया आरब्धा एव न तु समाप्ता। सा वर्तमानकालत्वेन निर्दिश्यते। वर्तमानकालः लट् इत्यपि व्यवह्रियते।

**१. इतरवचनद्वयं लिखत।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| उदा - | हसति | हसतः | हसन्ति |
| | १) लिखति | ........ | ........ |
| | २) क्रीडामि | ........ | ........ |
| | ३) ........ | नयथः | ........ |
| | ४) ........ | ........ | उत्तिष्ठन्ति |
| | ५) पिबसि | ........ | ........ |
| | ६) ........ | ........ | उपविशामः |
| | ७) ........ | स्मरथः | ........ |
| | ८) पश्यामि | ........ | ........ |
| | ९) ........ | पृच्छतः | ........ |
| | १०) ....... | मिलावः | ........ |

**२. संयोजयत।**

| अ | आ | उत्तराणि |
|---|---|---|
| १. मयूराः | गच्छसि | |
| २. मेघाः | पठथ | |
| ३. बालकौ | बोधयति | |
| ४. त्वम् | गर्जन्ति | |
| ५. यूयम् | लिखावः | |

NOT TO BE REPUBLISHED @KTBS

६. आवाम् धावतः ☐

७. अहम् नृत्यन्ति ☐

८. शिक्षकः खादामि ☐

३. **कर्तृपदानुसारं क्रियापदं योजयत ।**




लिखति ____________

पठतः ____________

पश्यतः ____________

पठामि ____________

लिखावः ____________

लिखामः ____________

पश्यामि ____________

पश्यन्ति ____________

स्थापयावः ____________

पठन्ति ____________

लिखन्ति ____________

स्थापयतः ____________

लिखामि ____________

पश्यावः ____________

लिखन्ति ____________

स्थापयन्ति ____________

हसतः ____________

*****

@KTBS NOT TO BE REPUBLISHED

# चतुर्थः पाठः

# नीतिबोधः

**(कण्ठपाठः करणीयः)**

१. काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तकाले सम्प्राप्ते काकः काकः पिकः पिकः ।।

- कुवलयानन्दः

२. अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ।।

- सुभाषितरत्नभाण्डागारः

३. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ।।

- हितोपदेशः

४. नरस्याभरणं रूपं रूपस्याभरणं गुणः।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ।।

- सुभाषितरत्नसमुच्चयः

## अन्वयार्थः

१. काकः = वायसः, कृष्णः = कृष्णवर्णः, पिकः = कोकिलः, कृष्णः = कृष्णवर्णः, पिककाकयोः = कोकिल - वायसयोः, को भेदः = कः व्यत्यासः, (तयोः समान-वर्णः) (किन्तु) वसन्तकाले = वसन्तसमये, सम्प्राप्ते, (सन्निहिते) काकः काकः, पिकः पिकः = तयोः स्वरभेदेन परिचयः ज्ञायते।

@KTBS NOT TO BE REPUBLISHED

२. मतिमान् = बुद्धिमान्, अर्थनाशम् = धनस्य नाशम्, मनस्तापम्=मनसः चिन्ताम्, गृहे = स्वगृहे विद्यमानम्, दुश्चरितानि = दुष्कार्याणि, वञ्चनम् = कपटताम्, अपमानम् = अवमाननम्, न प्रकाशयेत् = न प्रकटयेत्, (सर्वेषां समीपे न वदेत् इत्यर्थः)

३. धीमताम् = बुद्धिमताम्, कालः = समयः, काव्यशास्त्रविनोदेन = काव्यशास्त्राणाम् अध्ययनेन चिन्तनेन च, गच्छति = याति, (परन्तु) मूर्खाणाम् = मूढानाम् (समयः) व्यसनेन = दुष्कार्येण, निद्रया = निद्राकरणेन, कलहेन = वृथा विवादेन, गच्छति = याति। (समयस्य सदुपयोगः करणीयः इति भावः)

४. नरस्य = मानवस्य, आभरणं =विभूषणम्, रूपम् = सुरूपम्,
रूपस्य = सुरूपस्य, आभरणम् = विभूषणम्, गुणः = सद्गुणः,
गुणस्य = सद्गुणस्य, आभरणम् = विभूषणम्, ज्ञानम् = सुज्ञानम्,
ज्ञानस्य = सुज्ञानस्य आभरणम् = विभूषणम, क्षमा = दया भवति इति।

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।**
**नास्ति येषां यशःकाये जरामरणजं भयम्।।**

NOT TO BE REPUBLISHED @KTBS

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत।**

१. पिककाकयोः भेदः कदा ज्ञायते ?

२. अपमानं कः न प्रकाशयेत् ?

३. नरस्य आभरणं किम् ?

**२. लिङ्ग-विभक्ति-वचनानि लिखत।**

१. नाशम् २. विनोदेन ३. निद्रया ४. भक्ताय

**३. रेखाङ्कितपदानां प्रश्ननिर्माणं कुरुत।**

१. पिककाकयोः वर्णः कृष्णः अस्ति।

२. काव्यशास्त्रविनोदेन धीमतां कालः गच्छति।

३. रूपस्य आभरणं गुणः।

**४. विरुद्धार्थकपदानि लिखत।**

१. अपमानः २. मित्रम् ३. कृष्णः

**५. पर्यायपदानि लिखत।**

१. काकः २. मतिः ३. मित्रम् ४. नरः

NOT TO BE REPUBLISHED ©KTBS

## ६. संयोजयत।

| अ | आ |
|---|---|
| १. गृहे | १. मूर्खाणां कालः गच्छति |
| २. विनोदेन | २. ज्ञानस्याभरणम् |
| ३. कलहेन | ३. दुश्चरितानि न प्रकाशनीयानि |
| ४. क्षमा | ४. धीमतां कालः गच्छति |

## ७. चतुर्थं पदं लिखत।

१. गच्छति - आगच्छति। नयति ................।

२. काकः - प्रथमाविभक्तिः। गृहे ................।

३. कलहेन - तृतीयाविभक्तिः। वेदात् ..............।

४. मानम् - अपमानम्। अस्ति ..............।

## ८. समूहेतरपदं चिनुत।

१. दरिद्राय, निद्रया, रामाय, श्रोत्रियाय।

२. काकः, पिकः, गृहे, कृष्णः।

३. मतिमान्, अर्थनाशम्, मनस्तापम्, अपमानम्।

## ९. अन्यलिङ्गरूपं लिखत।

१. दरिद्रः     २. माता

## १०. संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा पञ्चषैः वाक्यैः उत्तरं लिखत।

१. धीमतां मूर्खाणां च कालः कथं गच्छति ?

@KTBS NOT TO BE REPUBLISHED

# अवधेयांशः

**सह** - 'सह' इति पदं यत्र प्रयुज्यते तत्र तृतीयाविभक्तिः भवति।

उदा : अहं मित्रेण सह आपणं गच्छामि।

पुत्री जनन्या सह गच्छति।

| **शुद्धम्** | **अशुद्धम्** |
|---|---|
| तेन सह | तस्य सह |
| मया सह | मम सह |
| जनन्या सह | जनन्याः सह |
| रामेण सह | रामस्य सह |

**विना** - 'विना' इति शब्दस्य योगे अपि तृतीयाविभक्तिः भवति। (अत्र द्वितीयां पञ्चमीं च अपि प्रयोक्तुं शक्नुमः)

उदा : १) तेन विना / तं विना / तस्मात् विना एषः न गच्छति।

२) जलेन / जलं / जलात् विना मीनः न जीवति।

NOT TO BE REPUBLISHED @KTBS

# क्रियाकलापः

**I. रिक्तस्थाने वर्णमेकं संयोज्य पदबन्धं कुरुत।**

| | | | |
|---|---|---|---|
| यु | व | | जः |
| क | | यु | गम् |
| दे | व | भा | |
| | र | सिं | हः |

| | | | |
|---|---|---|---|
| | म्बो | द | रः |
| वि | | को | शः |
| पु | र | न्द | |
| मा | तृ | | मिः |

(न - रा - षा - लि) (भू - ल - रः - त्त)

## II. वर्णक्रमं विचिन्त्य पदं रचयत।

| | | | | | |
|---|---|---|---|---|---|
| १) | दे | तो | हि | प | शः |
| २) | क्ष | मु | रा | सः | द्रा |
| ३) | वि | कम् | मा | अ | र |
| ४) | तम् | भो | च | ज | रि |

**उत्तराणि** १. .........................

२. .........................

३. .........................

४. .........................

## III. इतरवचनरूपाणि लिखत।

१. गृहे............ ............।

२. व्यसनेन ............ ............।

३. भक्ताय ............ ............।

४. दानात् ............ ............।

५. रूपस्य ............ ............।

६. काकः ............ ............।

७. तस्मै ............ ............।

@KTBS
NOT TO BE REPUBLISHED

## IV. शुद्धम् उत अशुद्धम् इति लिखत।

१) पिता पुत्रेण सह नगरं गतवान्। शुद्धं /अशुद्धम् ☐

२) माता प्रतिवेशिन्या सह मन्दिरं गतवती। शुद्धं /अशुद्धम् ☐

३) सः पादरक्षायाः विना गतवान्। शुद्धं /अशुद्धम् ☐

४) अहं स्यूतः विना आगतवान्। शुद्धं /अशुद्धम् ☐

५) भगिनी रेखया सह आपणं गतवती। शुद्धं /अशुद्धम् ☐

६) अहं शर्करया विना क्षीरं पिबामि। शुद्धं /अशुद्धम् ☐

७) धनस्य विना कार्यं न सिद्ध्यति। शुद्धं /अशुद्धम् ☐

८) रमेशः मित्रेण सह उपाहारगृहं गतवान्। शुद्धं /अशुद्धम् ☐

९) तस्य विना तृणमपि न चलति। शुद्धं /अशुद्धम् ☐

१०) पितामहः शुनकस्य सह वायुविहारार्थं गतवान्। शुद्धं /अशुद्धम् ☐

## V. वाक्यानि

सुरेशः सञ्चारशीलः। सः कदाचित् अन्येन सह गच्छति। पुनः कदाचित् अन्येन विना गच्छति। अधस्तनकोष्ठके ☐ चिह्नं 'सह' इति अर्थं, △ चिह्नं 'विना' इति अर्थं च प्रदर्शयति। तदाधारेण वाक्यानि रचयत।

उदा - सुरेशः मित्रेण सह मित्रगृहं गतवान्।

| | | |
|---|---|---|
| १) | मित्रम् ☐ | मित्रगृहम् |
| २) | भगिनी ☐ | मातुलगृहम् |
| ३) | अनुजः △ | चित्रमन्दिरम् |
| ४) | पत्नी △ | कार्यालयः |
| ५) | गृहसदस्याः ☐ | उद्यानम् |
| ६) | कर्मकरः △ | क्षेत्रम् |
| ७) | करदीपः △ | रक्षणार्थम् |
| ८) | उपनेत्रम् △ | ग्रन्थालयः |
| ९) | स्यूतः △ | आपणः |
| १०) | जनाः ☐ | भाषणं श्रोतुम् |

© KTBS NOT TO BE REPUBLISHED

## VI. नमः - नमः इत्यस्य योगे चतुर्थीविभक्तिः भवति।

स:

१) मित्र
२) रवि
३) सूर्य
४) भानु
५) खग
६) हिरण्यगर्भ
७) मरीचि
८) आदित्य
९) अर्क
१०) भास्कर
११) सूर्यनारायण

नमः इति वदति

उदा १. सः मित्राय नमः इति वदति।

२. ________________________

३. ________________________

४. ________________________

५. ________________________

६. ________________________

७. ________________________

९. ________________________

१०. ________________________

*****

@KTBS
NOT TO BE REPUBLISHED

## पञ्चमः पाठः

# सुबन्ताः

D8M4J6

पदम् इत्युक्ते अर्थबोधकः वर्णसमूहः। यदि वर्णसमूहात्मकः शब्दः सुबन्तः तिङन्तो वा भवति तर्हि तस्य पदमिति व्यवहारः व्याकरणशास्त्रे भवति। अत्र केचन सुबन्तशब्दाः प्रदत्ताः।

'अ' कारन्तः पुंलिङ्गः 'राम' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| प्रथमाविभक्तिः | रामः | रामौ | रामाः | ರಾಮನು, Rama is |
| सम्बोधनाप्रथमाविभक्तिः | हे राम | हे रामौ | हे रामाः | ಎಲೈ ರಾಮ, O! Rama |
| द्वितीयाविभक्तिः | रामं | रामौ | रामान् | ರಾಮನನ್ನು, to Rama |
| तृतीयाविभक्तिः | रामेण | रामाभ्याम् | रामैः | ರಾಮನಿಂದ, by Rama with Rama |
| चतुर्थीविभक्तिः | रामाय | रामाभ्याम् | रामेभ्यः | ರಾಮನಿಗಾಗಿ, For Rama to Rama |
| पञ्चमीविभक्तिः | रामात् | रामाभ्याम् | रामेभ्यः | ರಾಮನ ದೆಸೆಯಿಂದ from Rama |
| षष्ठीविभक्तिः | रामस्य | रामयोः | रामाणाम् | ರಾಮನ, of Rama |
| सप्तमीविभक्तिः | रामे | रामयोः | रामेषु | ರಾಮನಲ್ಲಿ, in Rama (at, upon, among, there) |

एवं जनक, सुरेश, गोपाल, आनन्द इत्यादयः शब्दाः ज्ञेयाः।

©KTBS NOT TO BE REPUBLISHED

'आ' कारान्तः स्त्रीलिङ्गः 'कला' शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | कला | कले | कलाः |
| **सं.प्र.वि.** | हे कले | हे कले | हे कलाः |
| **द्वि. वि** | कलाम् | कले | कलाः |
| **तृ.वि.** | कलया | कलाभ्याम् | कलाभिः |
| **च.वि.** | कलायै | कलाभ्याम् | कलाभ्यः |
| **पं. वि** | कलायाः | कलाभ्याम् | कलाभ्यः |
| **ष.वि.** | कलायाः | कलयोः | कलानाम् |
| **स.वि.** | कलायाम् | कलयोः | कलासु |

एवं सीता, रमा, शाला, इत्यादयः शब्दाः ज्ञेयाः

NOT TO BE REPUBLISHED @KTBS

'अ' कारान्तः नपुंसकलिङ्गः 'वन' शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | वनम् | वने | वनानि |
| **सं.प्र.वि.** | हे वन | हे वने | हे वनानि |
| **द्वि. वि** | वनम् | वने | वनानि |
| **तृ.वि.** | वनेन | वनाभ्याम् | वनैः |
| **च.वि.** | वनाय | वनाभ्याम् | वनेभ्यः |
| **पं. वि** | वनात् | वनाभ्याम् | वनेभ्यः |
| **ष.वि.** | वनस्य | वनयोः | वनानाम् |
| **स.वि.** | वने | वनयोः | वनेषु |

एवं फल, नयन, पुस्तक इत्यादयः शब्दाः ज्ञेयाः।

‘इ’ कारान्तः पुंलिङ्गः ‘हरि’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | हरिः | हरी | हरयः |
| **सं.प्र.वि.** | हे हरे | हे हरी | हे हरयः |
| **द्वि. वि** | हरिम् | हरी | हरीन् |
| **तृ.वि.** | हरिणा | हरिभ्याम् | हरिभिः |
| **च.वि.** | हरये | हरिभ्याम् | हरिभ्यः |
| **पं. वि** | हरेः | हरिभ्याम् | हरिभ्यः |
| **ष.वि.** | हरेः | हर्योः | हरीणाम् |
| **स.वि.** | हरौ | हर्योः | हरिषु |

एवं कवि, रवि, अग्नि, विधि इत्यादयः शब्दाः ज्ञेयाः ।

NOT TO BE REPUBLISHED @KTBS

‘इ’ कारान्तः स्त्रीलिङ्गः ‘मति’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | मतिः | मती | मतयः |
| **सं.प्र.वि.** | हे मते | हे मती | हे मतयः |
| **द्वि. वि** | मतिम् | मती | मतीः |
| **तृ.वि.** | मत्या | मतिभ्याम् | मतिभिः |
| **च.वि.** | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| **पं. वि** | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| **ष.वि.** | मत्याः/मतेः | मत्योः | मतीनाम् |
| **स.वि.** | मत्याम्/मतौ | मत्योः | मतिषु |

‘उ’ कारान्तः पुंलिङ्गः ‘गुरु’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| प्र.वि. | गुरुः | गुरू | गुरवः |
| सं.प्र.वि. | हे गुरो | हे गुरू | हे गुरवः |
| द्वि. वि | गुरुं | गुरू | गुरून् |
| तृ.वि. | गुरुणा | गुरुभ्याम् | गुरुभिः |
| च.वि. | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पं. वि | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| ष.वि. | गुरोः | गुर्वोः | गुरूणाम् |
| स.वि. | गुरौ | गुर्वोः | गुरुषु |

एवं शम्भु, भानु, वायु विष्णु इत्यादयः शब्दाः ज्ञेयाः ।

‘उ’ कारान्तः स्त्रीलिङ्गः ‘धेनु’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| प्र.वि. | धेनुः | धेनू | धेनवः |
| सं.प्र.वि. | हे धेनो | हे धेनू | हे धेनवः |
| द्वि. वि | धेनुम् | धेनू | धेनूः |
| तृ.वि. | धेन्वा | धेनुभ्याम् | धेनुभिः |
| च.वि. | धेन्वै - धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पं. वि | धेन्वाः-धेनोः | धेनुभ्याम् | धेनुभ्यः |
| ष.वि. | धेन्वाः-धेनोः | धेन्वोः | धेनूनाम् |
| स.वि. | धेन्वाम्-धेनौ | धेन्वोः | धेनुषु |

©KTBS NOT TO BE REPUBLISHED

‘द’ कारान्तः पुंलिङ्गः ‘तद्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | सः | तौ | ते |
| **द्वि. वि** | तम् | तौ | तान् |
| **तृ.वि.** | तेन | ताभ्याम् | तैः |
| **च.वि.** | तस्मै | ताभ्याम् | तेभ्यः |
| **पं. वि** | तस्मात् | ताभ्याम् | तेभ्यः |
| **ष.वि.** | तस्य | तयोः | तेषाम् |
| **स.वि.** | तस्मिन् | तयोः | तेषु |

‘द’ कारान्तः स्त्रीलिङ्गः तद् शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | सा | ते | ताः |
| **द्वि. वि** | ताम् | ते | ताः |
| **तृ.वि.** | तया | ताभ्याम् | ताभिः |
| **च.वि.** | तस्यै | ताभ्याम् | ताभ्यः |
| **पं. वि** | तस्याः | ताभ्याम् | ताभ्यः |
| **ष.वि.** | तस्याः | तयोः | तासाम् |
| **स.वि.** | तस्याम् | तयोः | तासु |

@KTBS NOT TO BE REPUBLISHED

‘द’ कारान्तः नपुंसकलिङ्गः ‘तद्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | तत् | ते | तानि |
| **द्वि. वि** | तत् | ते | तानि |
| **तृ.वि.** | तेन | ताभ्याम् | तैः |
| **च.वि.** | तस्मै | ताभ्याम् | तेभ्यः |
| **पं. वि** | तस्मात् | ताभ्याम् | तेभ्यः |
| **ष.वि.** | तस्य | तयोः | तेषाम् |
| **स.वि.** | तस्मिन् | तयोः | तेषु |

‘म’ कारान्तः पुंलिङ्गः ‘किम्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | कः | कौ | के |
| **द्वि. वि** | कम् | कौ | कान् |
| **तृ.वि.** | केन | काभ्याम् | कैः |
| **च.वि.** | कस्मै | काभ्याम् | केभ्यः |
| **पं. वि** | कस्मात् | काभ्याम् | केभ्यः |
| **ष.वि.** | कस्य | कयोः | केषाम् |
| **स.वि.** | कस्मिन् | कयोः | केषु |

@KTBS NOT TO BE REPUBLISHED

‘म’ कारान्तः स्त्रीलिङ्गः ‘किम्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| प्र.वि. | का | के | काः |
| द्वि. वि | काम् | के | काः |
| तृ.वि. | कया | काभ्याम् | काभिः |
| च.वि. | कस्यै | काभ्याम् | काभ्यः |
| पं. वि | कस्याः | काभ्याम् | काभ्यः |
| ष.वि. | कस्याः | कयोः | कासाम् |
| स.वि. | कस्याम् | कयोः | कासु |

‘म’ कारान्तः नपुंसकलिङ्गः ‘किम्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| प्र.वि. | किम् | के | कानि |
| द्वि. वि | किम् | के | कानि |
| तृ.वि. | केन | काभ्याम् | कैः |
| च.वि. | कस्मै | काभ्याम् | केभ्यः |
| पं. वि | कस्मात् | काभ्याम् | केभ्यः |
| ष.वि. | कस्य | कयोः | केषाम् |
| स.वि. | कस्मिन् | कयोः | केषु |

NOT TO BE REPUBLISHED ©KTBS

‘द’ कारान्तः त्रिलिङ्गः ‘अस्मद्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | अहम् | आवाम् | वयम् |
| **द्वि. वि** | माम् / मा | आवाम् / नौ | अस्मान् / नः |
| **तृ.वि.** | मया | आवाभ्याम् | अस्माभिः |
| **च.वि.** | मह्यम् / मे | आवाभ्याम् /नौ | अस्मभ्यम् / नः |
| **पं. वि** | मत् | आवाभ्याम् | अस्मत् |
| **ष.वि.** | मम / मे | आवयोः / नौ | अस्माकं / नः |
| **स.वि.** | मयि | आवयोः | अस्मासु |

‘द’ कारान्तः त्रिलिङ्गः ‘युष्मद्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | त्वम् | युवाम् | यूयम् |
| **द्वि. वि** | त्वाम् / त्वा | युवाम् / वाम् | युष्मान् / वः |
| **तृ.वि.** | त्वया | युवाभ्याम् | युष्माभिः |
| **च.वि.** | तुभ्यम् / ते | युवाभ्याम्/वाम् | युष्मभ्यम्/वः |
| **पं. वि** | त्वत् | युवाभ्याम् | युष्मत् |
| **ष.वि.** | तव/ते | युवयोः / वाम् | युष्माकम्/वः |
| **स.वि.** | त्वयि | युवयोः | युष्मासु |

©KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

**I. रिक्तस्थानं पूरयत।**

| | | ए.व. | द्वि.वि. | ब.व. |
|---|---|---|---|---|
| ● | प्र.वि. | रामः | .......... | रामाः |
| | सं.प्र.वि. | हे अज | हे अजौ | .......... |
| | द्वि.वि. | .......... | गजौ | .......... |
| | तृ.वि. | माधवेन | .......... | .......... |
| | च.वि. | .......... | .......... | मुकुन्देभ्यः |
| | पं.वि. | खगात् | .......... | .......... |
| | ष.वि. | .......... | नगयोः | .......... |
| | स.वि. | वृक्षे | .......... | .......... |
| ● | प्र.वि. | माला | .......... | मालाः |
| | सं.प्र.वि. | हे कले | .......... | हे कलाः |
| | द्वि. वि | .......... | राधे | .......... |
| | तृ.वि. | शालया | .......... | शालाभिः |
| | च.वि. | .......... | सीताभ्याम् | .......... |
| | पं. वि | वनितायाः | .......... | .......... |
| | ष.वि. | .......... | .......... | महिलानाम् |
| | स.वि. | रमायां | .......... | .......... |

@KTBS
NOT TO BE REPUBLISHED

| | | | |
|---|---|---|---|
| ● प्र.वि. | .......... | वने | .......... |
| सं.प्र.वि. | हे ज्ञान | .......... | हे ज्ञानानि |
| द्वि. वि | .......... | .......... | फलानि |
| तृ.वि. | पुस्तकेन | .......... | .......... |
| च.वि. | नयनाय | .......... | नयनेभ्यः |
| पं. वि | .......... | यन्त्राभ्याम् | .......... |
| ष.वि. | धनस्य | .......... | .......... |
| स.वि. | .......... | शरीरयोः | .......... |

**II. कोष्टके कानिचन पदानि सन्ति। तानि उपयुज्य उत्तराणि लिखत।**

**पत्रिकाम्, राधया, सीतायाः, शुभायै, अनुजायाम्, रमा**

१. अत्र का पठति ?

..................................

२. सा कां पठति ?

..................................

३. सा कया सह पठति ?

..................................

४. सा कस्यै फलानि यच्छति ?

..................................

५. सा कस्याः पुत्री अस्ति ?

..................................

६. सा कस्यां विश्वसिति ?

..................................

@KTBS NOT TO BE REPUBLISHED

## III. एतानि वाक्यानि विभक्तिक्रमेण लिखत।

मुखं प्रक्षालयति

गृहे अभ्यासं करोति

भास्कराय नमः इति वदति

प्रातः उत्तिष्ठति

रामः

मित्रस्य पुस्तकम् इच्छति

नेत्राभ्यां देवदर्शनं करोति

जनकात् दिनपत्रिकां स्वीकरोति

हे देव! मां रक्ष! इति वदति

NOT TO BE REPUBLISHED @KTBS

## IV. अकारान्तपुंलिङ्गशब्दानां स्थाने आकारान्तस्त्रीलिङ्गशब्दान् उपयुज्य लिखत।

उदा - बालकौ धावतः। बालिके धावतः। (बालिका)

१) शिष्यः मूषकान् पश्यति। शिष्या ............. पश्यति। (मूषिका)

२) पुत्रः जनकेन सह गच्छति। पुत्रः ............. सह गच्छति (अम्बा)

३) माता सुताय क्षीरं यच्छति। माता ............. क्षीरं यच्छति (सुता)

४) फलानि वृक्षात् पतन्ति। फलानि ............. पतन्ति (लता)

## V. पुंलिङ्ग - नपुंसकलिङ्गशब्दान् पृथक् लिखत।

पुत्र, मित्र, सुरेश, जनक, पुस्तक, ज्ञान, पुष्प, बालक, वृक्ष, सुख, जल, गोपाल, भोजन

**VI. निर्देशानुरं परिवर्तयत।**

उदा - वनिता पुष्पम् आनयति (बहुवचने)

वनिता पुष्पाणि आनयति।

१. रामः पत्रं पठति (बहुवचने)

.........................................।

२. शीला उद्यानानि पश्यति (एकवचने)

.........................................।

३. माधवः शुनकेन सह गच्छति (बहुवचने)

.........................................।

४. फलानि मित्राय ददाति। (बहुवचने)

.........................................।

५. छात्राः उद्यानेभ्यः आगच्छन्ति (एकवचने)

.........................................।

६. अध्यापकः पुस्तकस्य चयनं करोति। (बहुवचने)

.........................................।

७. मृगाः वनेषु भवन्ति। (एकवचने)

.........................................।

*****

©KTBS NOT TO BE REPUBLISHED

## षष्ठः पाठः

# आरोग्यभाग्यम्



(अध्यापकः कक्ष्यां प्रविशति। छात्राः उत्तिष्ठन्ति नमस्कुर्वन्ति च)

आचार्य ! प्रणामाः !

आचार्यः - शुभं भवतु। सुप्रभातम्। **यूयं** सर्वे उपविशत।

(छात्राः उपविशन्ति)

मनोजः - आचार्य ! **अस्माकं** कक्ष्यानायकः रमेशः अनुपस्थितः।

आचार्यः - किमर्थं सः अनुपस्थितः ?

रविः - सः उदरवेदनया, ज्वरेण च पीडितः अस्ति।

आचार्यः - ह्यः सः स्वस्थः एव आसीत् किल..... !

रविः - आम्! परन्तु सः शालागमनसमये मार्गस्य पार्श्वे खाद्यं खादितवान्। तत् स्थलम् अधिकं मालिन्यपूर्णम् आसीत्।

© KTBS NOT TO BE REPUBLISHED

आचार्यः - छात्राः ! गृहात् बहिः मार्गपार्श्वे, तत्रापि मलिनप्रदेशे, विक्रयिकाः खाद्यस्य विक्रयणं कुर्वन्ति। तत्र आहारस्वीकरणेन अस्वास्थ्यं जायते। अतः **अहं** सर्वदा वदामि 'तादृशेषु प्रदेशेषु आहारं मा खादत' इति।

दिव्या - श्रीमन्! **मम** एकः प्रश्नः। प्रातः सूर्यनमस्कारकरणेन स्वास्थ्यस्य रक्षणं भवति किम्?

आचार्यः - आम् ! अवश्यं भवत्येव। यतः 'आरोग्यं भास्करादिच्छेत्' इति वचनं प्रसिद्धम् अस्ति। अतः प्रतिदिनं प्रातः अवश्यं सूर्यनमस्कारं कुरुत।

सरला - आचार्य ! आङ्ग्लभाषायाम् अपि एकं प्रसिद्धं वाक्यम् अस्ति खलु! 'Prevention is better than cure' इति।

आचार्यः - आम् ! चरकमहर्षेः वचनम् अपि एवम् अस्ति।

**विनापि भेषजैर्व्याधिः पथ्येनैव निवर्तते।**

**न हि पथ्यविहीनानां भेषजानां शतैरपि।। इति।**

आरोग्यविषये ज्ञातव्यम् इतोऽपि बहु अस्ति।

छात्रः - **वयमपि** अधिकं ज्ञातुम् इच्छामः।

सुमित्रा - आचार्य ! मम पिता सर्वदा वदति, ''भोजनान्ते तक्रसेवनं कुरु' इति, किं तत्र कारणम् ?

आचार्यः - उत्तमः प्रश्नः। चरकसंहितायाम् एवम् अस्ति -

**न तक्रसेवी व्यथते कदाचित्**

**न तक्रदग्धाः प्रभवन्ति रोगाः।**

**यथा सुराणाम् अमृतं हिताय**

**तथा नराणां भुवि तक्रमाहुः।। इति।**

©KTBS NOT TO BE REPUBLISHED

गुणेशः - श्रीमन् ! क्रीडनेनापि **अस्माकम्** आरोग्यस्य रक्षणं भवति वा?

आचार्यः - अवश्यं भवति। यतः 'शरीरमाद्यं खलु धर्मसाधनम्' इति कालिदासोक्तिः प्रसिद्धा अस्ति।

सुगुणः - आचार्य ! शरीरसंरक्षणेन शारीरकस्वास्थ्यं तु भवति, किन्तु मानसिकारोग्यम् ...........?

आचार्यः - मानासिकारोग्यं योगाभ्यासेन जायते। अतः शुद्धाहारसेवनया, व्यायामेन, योगाभ्यासेन च आरोग्यस्य संरक्षणं भवति।

अतः **वयम्** आरोग्यभाग्याय एवं प्रार्थयामः।

(छात्राः मिलित्वा गायन्ति)

**श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम्।**
**आयुष्यं तेज आरोग्यं देहि मे करुणाकर।।**

'लोकाः समस्ताः सुखिनो भवन्तु'

*****

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत।**

१. रमेशः किमर्थम् अनुपस्थितः?

२. केन आरोग्यस्य रक्षणं भवति ?

३. आरोग्यं कस्मात् इच्छेत् ?

४. तक्रं केषां हिताय भवति ?

**२. यथानिर्देशं लिखत।**

१. सूर्यनमस्कारेण स्वास्थ्यस्य रक्षणं भवति किम् ?

कः पाठः ? का पृच्छति ? कं पृच्छति ?

२. मानसिकारोग्यं योगाभ्यासेन जायते।

कः पाठः ? कः वदति ? कान् वदति ?

**३. रिक्तस्थानानि पूरयत।**

१. प्रातः ............. आरोग्यरक्षणं भवति।

२. न हि .............. भेषजानां शतैरपि।

३. लोकाः समस्ताः ............. भवन्तु।

**४. वाक्यं रचयत।**

१. अस्माकम् २. सर्वदा ३. प्रतिदिनम्

**५. अन्यलिङ्गपदं लिखत।**

१. छात्रः २. स्वस्थः ३. प्रसिध्दः ४. पिता

**६. चतुर्थं पदं लिखत।**

१. अहं - पठामि। वयम् ............ ।

२. त्वं - वदसि । यूयं ............।

३. फलम् - अस्ति। फलानि ..........।

४. विद्यालयस्य - षष्ठीविभक्तिः। दूरात् ...........।

NOT TO BE REPUBLISHED @KTBS

७. **समूहेतरपदं लिखत।**

१. भवति - आसीत् - अस्ति - प्रविशति।

२. सूर्यः - पीडितः - ह्यः - आचार्यः।

३. श्रद्धाम् - बुद्धिम् - ज्ञानम् - विद्याम्।

८. **विरुद्धार्थकपदानि लिखत।**

१. बहिः २. अधिकम् ३. उपस्थितः ४. अमृतम्

९. **संयोज्य लिखत।**

| | |
|---|---|
| १. अहम् | लिखावः |
| २. त्वम् | पठथ |
| ३. यूयम् | क्रीडसि |
| ४. वयम् | स्मरन्ति |
| | पठामि |
| | गच्छामः |

@KTBS NOT TO BE REPUBLISHED

## अवधेयांशः

**I.** या क्रिया आगामिनि काले सम्भविता तत्र लृट्लकारः।

उदा - १) जनकः नगरं गमिष्यति।

२) बालिका भोजनं करिष्यति।

३) कण्ठपाठस्पर्धा भविष्यति।

वि.सू.-
- भविष्यत्काले वर्तमानकालवत् एव प्रत्ययाः भवन्ति।
- धातोः प्रत्ययस्य च मध्ये 'स्य' योज्यते।

- **इकारात् परं स् - ष् भवति (गम् + इ + स्य (स् + य) (ष् + य) + ति = गमिष्यति)**

| लट् | लृट् |
|---|---|
| गच्छति | गमिष्यति |
| करोति | करिष्यति |
| भवति | भविष्यति |

- **केचन धातवः इकारं न प्राप्नुवन्ति।**

| | | |
|---|---|---|
| यथा - | नयति | नेष्यति |
| | उपविशति | उपवेक्ष्यति |
| | पिबति | पास्यति |
| | जानाति | ज्ञास्यति |

NOT TO BE REPUBLISHED @KTBS

| भूधातुः | भविष्यत् कालः | | लृट् लकारः। |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | भविष्यति | भविष्यतः | भविष्यन्ति |
| **मध्यमपुरुषः** | भविष्यसि | भविष्यथः | भविष्यथ |
| **उत्तमपुरुषः** | भविष्यामि | भविष्यावः | भविष्यामः |

## क्रियाकलापः

**I. उदाहरणानुगुणं लिखत।**

अहम् / आवाम् / वयम् / अस्मि / स्वः / स्मः

१. अहं बालकः अस्मि। आवां बालकौ स्वः। वयं बालकाः स्मः।

२. ...... ...... .....। ..... वैद्यौ .....। ..... ..... .....।

३. ..... ..... .....। ..... ..... .....। ..... शिक्षकाः .....।

४. ..... रक्षकः .....। ..... ..... .....। ..... ..... .....।

५. ..... ..... .....। ..... सेवकौ .....। ..... ..... .....।

६. अहं बालिका अस्मि। आवां बालिके स्वः। वयं बालिकाः स्मः।

७. ..... ..... .....। ..... महिले .....। ..... ..... .....।

८. ..... ..... .....। ..... ..... .....। ..... रसनाः .....।

९. ..... सेविका .....। ..... ..... .....। ..... ..... .....।

१०. ..... ..... .....। ..... ..... .....। ..... शिक्षिकाः .....।

## II. उदाहरणानुगुणं लिखत।

त्वम् / युवाम् / यूयम् / असि / स्थः / स्थ

१. त्वं बालकः असि। युवां बालकौ स्थः। यूयं बालकाः स्थ।
त्वं पठसि। युवां पठथः। यूयं पठथ।

२. त्वं रक्षकः असि। ...... ...... ......। ...... ...... ......।
त्वं रक्षसि। ...... ...... ......। ...... ...... ......।

३. त्वं पाचकः असि। ...... ...... ......। ...... ...... ......।
त्वं पचसि। ...... ...... ......। ...... ...... ......।

४. त्वं शिक्षकः असि। ...... ...... ......। ...... ...... ......।
त्वं पाठयसि। ...... ...... ......। ...... ...... ......।

५. त्वं गायिका असि। ...... ...... ......। ...... ...... ......।
त्वं गायसि। ...... ...... ......। ...... ...... ......।

©KTBS NOT TO BE REPUBLISHED

## III. उदाहरणानुगुणं परिवर्तयत।

उदा - हसति - हसिष्यति

१. क्रीडति ..........

२. खादति ..........

३. स्मरति ..........

४. पठति ..........

५. आचरति ..........

## IV. वाक्यानि परिवर्तयत। (भविष्यत्काले)

१. रामः पुस्तकं पठति। ....................।

२. बालः फलं खादति। ....................।

३. शिष्यः पाठं लिखति। ....................।

४. अग्रजः आपणं गच्छति। ....................।

५. पर्यटकः नगरे सञ्चरति। ....................।

६. गुरुः ग्रन्थं नयति। ....................।

## V. क्रियापदस्य इतरवचनानि लिखत।

१. करिष्यति ....... .......।

२. मेलिष्यति ....... .......।

३. ....... ....... करिष्यथ।

४. ....... मेलिष्यथः .......।

५. ....... करिष्यावः .......।

६. ....... ....... मेलिष्यामः।

## VI. शब्दस्य इतरवचनानि लिखत।

१. शालाम् ............ ............।

२. भविष्यति ............ ............।

३. कण्ठे ............ ............।

४. महाराजस्य ............ ............।

*****

NOT TO BE REPUBLISHED @KTBS

सप्तमः पाठः

# जीवनसाफल्यम्

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम् ।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः ।। १ ।।

हरिमन्दिरमिदमखिलशरीरम्
धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः
धेनुर्माता परमशिवा ।।
नित्यं प्रातः शिवगुणगानं
दीपनुतिः खलु शत्रुपरा ।। २ ।। ।। मृदपि ।।

भाग्यविधायि निजार्जितकर्म
यत्र श्रमः श्रियमर्जयति।
त्यागधनानां तपोनिधीनां
गाथां गायति कविवाणी ।।
गङ्गाजलमिव नित्यनिर्मलं
ज्ञानं शंसति यतिवाणी ।। ३ ।। ।। मृदपि ।।

यत्र हि नैव स्वदेहविमोहः
युद्धरतानां वीराणाम्
यत्र हि कृषकः कार्यरतः सन्
पश्यति जीवनसाफल्यम्
जीवनलक्ष्यं न हि धनपदवी
यत्र च परशिवपदसेवा ।। ४ ।। ।। मृदपि ।।

NOT TO BE REPUBLISHED ©KTBS

## भावार्थाः

१. अस्मिन् भारतदेशे विद्यमाना मृत्तिका चन्दनमिव परिमलयुक्ता, सर्वेऽपि ग्रामाः तपोवनसदृशाः । अत्र सर्वा अपि बालिकाः देव्याः स्वरूपाः सर्वे बालकाः श्रीरामसदृशाः च ।

२. अत्र जन्म प्राप्तवतां सर्वेषां शरीरं हरेः मन्दिरम् । जनानां समीपे विद्यमानानि धनानि जनसेवायै एव उपयुक्तानि भवन्ति । अत्र वनराजः सिंहः अपि क्रीडनकरूपेण उपयुज्यते । परमपवित्रा धेनुः सर्वेषां जननी ।

प्रतिदिनं प्रातः भगवतः स्तुतिः भवति । अपि च सायम् प्रज्वाल्यमानः दीपः शत्रूणाम् अपि मङ्गलं करोतु इति दीपनमस्कारं जनाः कुर्वन्ति।

३. सर्वेऽपि श्रमेणैव धनम् अर्जयन्ति । स्वार्जितकर्म एव भाग्यं विदधाति । त्यागजीविनां तपस्विनां च श्रेष्ठत्वं कवेः वाणी गायति । यतीनां स्मृतिवाक्यानि गङ्गाजलमिव परमं पवित्रं ज्ञानं प्रदास्यन्ति ।

४. अत्र सर्वेषां युद्धरतानां वीराणां स्वशरीरव्यामोहः नास्ति । कृषीवलाः सर्वदा कार्यं कुर्वन्तः एव जीवने सफलतां प्राप्नुवन्ति । अत्र देशे सर्वेषां लक्ष्यं एकमेव अस्ति यत् दीनजनानां सेवा, न तु धनसङ्ग्रहः पदवी प्राप्तिः वा।

**कविकाव्यविचारः**

**कविः - विद्वान् जनार्दन हेगडे**

**जननम् - ०२-०६-१९५५**

**जन्मस्थानम् - शिरसि, उत्तरकन्नडमण्डलम्, कर्णाटकराज्यम्।**

**कृतयः - अभ्यासदर्शिनी। णत्वणिजन्तम्।**

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. गङ्गाजलमिव नित्यनिर्मलं किम् ?

२. धनशक्ती किमर्थम् ?

३. त्यागधनानां गाथां का गायति ?

४. कृषकः किं पश्यति ?

२. **समानार्थकपदानि लिखत ।**

१. मन्दिरम्  २. वनराजः  ३. निर्मलम्

३. **संयोज्य लिखत ।**

| अ | आ |
|---|---|
| १. क्रीडायै | सप्तमीविभक्तिः |
| २. युद्धरतानां | प्रथमाविभक्तिः |
| ३. पदसेवा | षष्ठीविभक्तिः |
| ४. देशे | तृतीयाविभक्तिः |
| | चतुर्थीविभक्तिः |

४. **ससूहेतरं पदं लिखत ।**

१. बालः, रामः, प्रातः, कृषकः ।

२. गाथाम्, सेवा, बाला, स्वरूपा

३. त्यागधनानाम्, शिवगुणगानम्, वीराणाम्, युद्धरतानाम् ।

@KTBS
NOT TO BE REPUBLISHED

# अवधेयांशः

## परम्परां संरक्षेम

कृत्वा नवदृढसङ्कल्पम्
वितरन्तो नवसन्देशम्
घटयामो नवसङ्घटनम्
रचयामो नवमितिहासम् ।।

नवमन्वन्तरशिल्पिनः
राष्ट्रसमुन्नतिकाङ्क्षिणः
त्यागधनाः कार्यैकरताः
कृत निपुणा वयमविषण्णाः ।।   ।। कृत्वा।।

भेदभावनां निरासयन्तः
दीनदरिद्रान् समुद्धरन्तः
दुःखवितप्तान् समाश्वसन्तः
कृतसङ्कल्पान् सदा स्मरन्तः ।।   ।। कृत्वा।।

प्रगतिपथान्नहि विचलेम
परम्परां संरक्षेम
समुत्साहिनो निरुद्वेगिनो
नित्यनिरन्तरगतिशीलाः।।   ।। कृत्वा।।

- श्री जनार्दन हेगडे.

@KTBS NOT TO BE REPUBLISHED

**जनार्दनहेगडेमहोदयस्य अन्याः कृतयः -**

१. सम्भाषणसोपानम्।

२. विभक्तिवल्लरी।

३. शतृशानजन्तमञ्जरी।

४. कन्नडसंस्कृतकोषः।

५. शिशुगीतानि।

६. देशभक्तिगीतानि।

**विशेषः -** संस्कृतभारत्याः आरम्भकर्तृषु अन्यतमः, प्रमुखश्च। संस्कृतभाषा-शिक्षणे अस्ति अस्य महत् योगदानम्। एषः विविधपाठ्यपुस्तकसमितेः सदस्यः 'सम्भाषणसन्देश'मासपत्रिकायाः सम्पादकश्च।

प्रशस्तिः - साहित्य अकाडेमि अनुवादप्रशस्तिः - २००५.

*****

@KTBS
NOT TO BE REPUBLISHED

**अष्टमः पाठः**

# पत्रलेखनम्

X7W9R1

## विरामपत्रम्

सकाशात्,

गौरी / गणेशः

अष्टमकक्ष्या 'अ' विभागः

सर्वकारीयप्रौढशाला

हासनम्

सविधे,

मुख्योपाध्यायः

सर्वकारीयप्रौढशाला

हासनम्

मान्याः,

विषयः - दिनत्रयस्य विरामं सम्प्रार्थ्य,

अहं श्वः मातापितृभ्यां सह मैसूरुनगरं गमिष्यामि। तत्र मम बन्धुगृहे उत्सवः वर्तते। अतः श्वः आरभ्य दिनत्रयं विरामं यच्छन्तु इति सविनयं प्रार्थये।

स्थलम् - हासनम् इति विधेया छात्रा / विधेयः छात्रः

दिनाङ्कः - १४-०८-२०१९ गौरी / गणेशः

@KTBS NOT TO BE REPUBLISHED

## पुस्तकप्रेषणविषये पत्रम्

सकाशात्,

महेशः / मालती

गृहसंख्या - १२/४, मुख्यमार्गः

शिवमोग्गा.

सविधे,

प्रबन्धकः

अक्षरप्रकाशनसंस्था

गिरिनगरम्

बेङ्गलूरु.

मान्याः,

विषयः - अपेक्षितानि पुस्तकानि सम्प्रार्थ्य,

अहम् अधोलिखितानि पुस्तकानि क्रेतुम् इच्छामि। कृपया एतानि पुस्तकानि प्रेषयन्तु।

१. सरलसंस्कृतव्याकरणम् ............. १

२. निबन्धप्रकाशः ............. १

३. संस्कृत-अभ्यासपुस्तिका ............. १

सधन्यवादम्,

स्थलम् - शिवमोग्गा — भवतः विश्वासपात्रम्,

दिनाङ्कः - ०८-१२-२०१९ — महेशः/मालती

©KTBS NOT TO BE REPUBLISHED

# अवधेयांशः

- **पत्रलेखनावसरे एते अंशाः अवधेयाः।**

१) पत्रस्य आदौ एव पत्रलेखकस्य सङ्केतः भवेत्।

२) स्वीकर्तुः नामलेखनम् न अनिवार्यम्। परन्तु पदोल्लेखः अवश्यं करणीयः।

३) स्वीकर्तुः पदम् उल्लिख्य तस्य सम्बोधनं भवेत्।

यथा -

माननीय /माननीये

मान्यः / मान्ये

सम्पादकवर्य

४) यस्मिन् विषये पत्रं लिखामः सः विषयः एकवाक्येन भवेत्।

५) विषयस्य साक्षात् उपस्थापनं भवति। विवरणं च।

६) उपसंहारे सामान्यतः भवदीयः। भवदीया इत्यादयः भवन्ति।

७) अत्र लेखकस्य हस्ताङ्कनं भवति।

८) स्थलनिर्देशः पत्रप्रेषणस्य दिनाङ्कः च भवति।

NOT TO BE REPUBLISHED @KTBS

# क्रियाकलापः

## पत्रलेखनम्

पत्रेषु यथा व्यक्तिगतानि पत्राणि भवन्ति तथैव कानिचन कार्यालयसम्बद्धानि पत्राणि अपि भवन्ति। अत्र अभ्यासार्थं कार्यालयसम्बद्धानि पत्राणि दत्तानि।

पत्रस्वरूपम् एवं भवितुम् अर्हति।

सकाशात्
________
________
________

१. लेखकस्य सङ्केतः

सविधे,
________
________
________

२. स्वीकर्तुः सङ्केतः

३. सम्बोधनम्

४. विषयः - (विषयनाम)

५. प्रतिपाद्यः विषयः

६. उपसंहारः

७. हस्ताङ्कनम्

८. स्थलम्
दिनाङ्कः

@KTBS
NOT TO BE REPUBLISHED

● मञ्जूषायाः उचितं पदं स्वीकृत्य पत्रं पूरयत।

**सकाशात्,**

राम: / रमा

.............

शङ्करमार्गः

.............

**सविधे,**

सम्पादकः

सम्भाषणसन्देशः

.................

गिरिनगरम्

बेङ्गलूरु - ८५

............

**विषयः** - ग्राहकत्वस्वीकरणाय

अहं सम्भाषणसन्देशस्य ......... ज्ञातवान्। ज्ञातवती। तत्र प्रकट्यमानाः लेखाः ......... भवन्ति। अतः ......... पत्रिकायाः ग्राहकः भवितुम् ......... । तदर्थं ......... प्रेषयन्/ प्रेषयन्ती अस्मि। ......... अवसरं कल्पयतु।

भवदीयः/भवदीया

रामः/रमा

स्थलम् - हासनम्

दिनाङ्कः -

| |
|---|
| इच्छामि, धनम्, हासनम्, विषयम्<br>गृहसंख्या १/११, उत्तमाः, सम्पादकवर्य<br>मासपत्रिका, अहम्, कृपया |

@KTBS NOT TO BE REPUBLISHED

U8R2K2

## नवमः पाठः

# तिङन्ताः

क्रियापदानां मूलभूतं शब्दरूपं 'धातुः' इति कथ्यते। अर्थात् क्रियायाः बोधकाः भू-रम्-पठ् इत्यादयः धातुः इति संज्ञया व्यवह्रियन्ते।

क्रियापदे → धातुः + विकरणप्रत्ययः + तिङ्प्रत्ययः च इति त्रयःभागाः सन्ति।

अत्र तिङन्तमेव क्रियापदम् इति व्यवह्रियते।

उदा → पठ् + अ + ति = पठति

संस्कृतभाषायां प्रायः द्विसहस्रं (२०००) धातवः सन्ति। व्यवस्थादृष्ट्या ते धातवः दशसु गणेषु विभक्ताः। एते २००० धातवः पुनः त्रिधा विभक्ताः।

१. परस्मैपदिनः, २. आत्मनेपदिनः ३. उभयपदिनः च इति ।

एतेषां क्रियापदानां त्रयः पुरुषाः भवन्ति। ते प्रथमपुरुषः - मध्यमपुरुषः - उत्तमपुरुषः च इति। एतेषां त्रीणि वचनानि अपि भवन्ति। तानि एकवचनं, द्विवचनं, बहुवचनं च इति।

धातुभिः या क्रिया प्रतिपाद्यते तस्याः त्रयः कालाः सम्भवन्ति।

| **कालः** | **उदाहरणम्** |
|---|---|
| वर्तमानकालः | पठति |
| भविष्यत्कालः | पठिष्यति |
| भूतकालः | अपठत् |

क्रियायाः कालस्य अर्थविशेषस्य च बोधनार्थं दश लकाराः भवन्ति।

NOT TO BE REPUBLISHED @KTBS

**लट् वर्तमाने लेट् वेदे भूते लुङ्लङ्लिटस्तथा।**
**विध्याशिषोश्च लिङ्लोटौ लुट् लृट् लृङ् च भविष्यति॥**

१. वर्तमानकाले धातोः लट्लकारः भविष्यति।

२. आज्ञा,प्रार्थना इत्यादिषु अर्थेषु धातोः लोट्लकारः भवति।

३. भूतकाले लङ्लकारः भवति।

## पठ्धातुः

## लट्लकारः - वर्तमानकालः - परस्मैपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रामः<br>माला<br>सः → पठति<br>सा<br>तत् | रामौ<br>माले<br>तौ → पठतः<br>ते<br>ते | रामाः<br>मालाः<br>ते → पठन्ति<br>ताः<br>तानि |
| मध्यमपुरुषः | त्वम् → पठसि | युवां → पठथः | यूयम् → पठथ |
| उत्तमपुरुषः | अहम् → पठामि | आवां → पठावः | वयम् → पठामः |

@KTBS NOT TO BE REPUBLISHED

## भू धातुः

## लट्लकारः, वर्तमानकालः - परस्मैपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | खेलति | खेलतः | खेलन्ति |
| मध्यमपुरुषः | खेलसि | खेलथः | खेलथ |
| उत्तमपुरुषः | खेलामि | खेलावः | खेलामः |

## हस् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | हसति | हसतः | हसन्ति |
| मध्यमपुरुषः | हससि | हसथः | हसथ |
| उत्तमपुरुषः | हसामि | हसावः | हसामः |

©KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

## लृट् लकारः भविष्यत्कालः - 'पठ्' धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | खेलिष्यति | खेलिष्यतः | खेलिष्यन्ति |
| मध्यमपुरुषः | खेलिष्यसि | खेलिष्यथः | खेलिष्यथ |
| उत्तमपुरुषः | खेलिष्यामि | खेलिष्यावः | खेलिष्यामः |

## हस् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | हसिष्यति | हसिष्यतः | हसिष्यन्ति |
| मध्यमपुरुषः | हसिष्यसि | हसिष्यथः | हसिष्यथ |
| उत्तमपुरुषः | हसिष्यामि | हसिष्यावः | हसिष्यामः |

©KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

## लङ् लकारः भूतकालः - पठ् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अखेलत् | अखेलताम् | अखेलन् |
| मध्यमपुरुषः | अखेलः | अखेलतम् | अखेलत |
| उत्तमपुरुषः | अखेलम् | अखेलाव | अखेलाम |

## हस् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अहसत् | अहसताम् | अहसन् |
| मध्यमपुरुषः | अहसः | अहसतम् | अहसत |
| उत्तमपुरुषः | अहसम् | अहसाव | अहसाम |

© KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

## लोट् लकारः - पठ् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु / पठतात् | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ / पठतात् | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | खेलतु/खेलतात् | खेलताम् | खेलन्तु |
| मध्यमपुरुषः | खेल / खेलतात् | खेलतम् | खेलत |
| उत्तमपुरुषः | खेलानि | खेलाव | खेलाम |

## हस् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | हसतु/हसतात् | हसताम् | हसन्तु |
| मध्यमपुरुषः | हस / हसतात् | हसतम् | हसत |
| उत्तमपुरुषः | हसानि | हसाव | हसाम |

© KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) - धातु

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छतु/गच्छतात् | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ / गच्छतात् | गच्छतम् | गच्छत |
| उत्तमपुरुषः | गच्छानि | गच्छाव | गच्छाम |

## आत्मनेपदी - लट् लकारः - शोभ्धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शोभते | शोभेते | शोभन्ते |
| मध्यमपुरुषः | शोभसे | शोभेथे | शोभध्वे |
| उत्तमपुरुषः | शोभे | शोभावहे | शोभामहे |

## वर्ध् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्धते | वर्धेते | वर्धन्ते |
| मध्यमपुरुषः | वर्धसे | वर्धेथे | वर्धध्वे |
| उत्तमपुरुषः | वर्धे | वर्धावहे | वर्धामहे |

## लभ् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लभते | लभेते | लभन्ते |
| मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुषः | लभे | लभावहे | लभामहे |

@KTBS NOT TO BE REPUBLISHED

## एध् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | एधते | एधेते | एधन्ते |
| मध्यमपुरुषः | एधसे | एधेथे | एधध्वे |
| उत्तमपुरुषः | एधे | एधावहे | एधामहे |

## विशेषक्रियारूपाणि

## अस् - धातुः - लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

# कृञ् (कृ) धातुः - लट् लकारः

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

## अभ्यासः

**१. उचितम् उत्तरं चित्वा लिखत ।**

१) क्रियापदानां मूलरूपम् एवं कथ्यते।

अ) सुबन्तः आ) तिङन्तः इ) धातुः ई) उपसर्गः

२) वर्तमानकाले धातोः अयं लकारः भवति।

अ) लङ् आ) लट् इ) लृट् ई) लोट्

३) 'हसिष्यति' अस्य बहुवचनरूपम् इदं भवति।

अ) हसिष्यामि आ) हसिष्यथः इ) हसिष्यन्ति ई) हसिष्यामः

४) संस्कृतभाषायां प्रायः एतावन्तः धातवः सन्ति।

अ) २००० आ) ३००० इ) १००० ई) ५०००

५) क्रियापदस्य नामान्तरम् इदं भवति।

अ) सुबन्तम् आ) धातुः इ) प्रत्ययः ई) तिङन्तम्

**२. इतरवचनद्वयं लिखत ।**

१. .......... पठथः ..........।

२. हसामि .......... ..........।

© KTBS NOT TO BE REPUBLISHED

| | | | |
|---|---|---|---|
| ३. | .......... | .......... | गच्छन्ति। |
| ४. | .......... | अनमताम् | ..........। |
| ५. | .......... | .......... | हसथ। |
| ६. | पठिष्यति | .......... | ..........। |
| ७. | .......... | शोभेते | ..........। |
| ८. | गच्छानि | .......... | ..........। |

## क्रियाकलापः

**I. उदाहरणानुसारं भूतकालवाक्यानि लिखत ।**

वर्तमानकाले भूतकाले

उदा १. सः पठति। सः अपठत्।

२. रामः वनं गच्छति। ...............।

३. रमा लेखन्या लिखति। ...............।

४. बालकः उत्तरं यच्छति। ...............।

५. वृक्षात् फलं पतति। ...............।

NOT TO BE REPUBLISHED @KTBS

**II. उचितक्रियापदेन रिक्तस्थानं पूरयत ।**

१. बालकाः पुस्तकम् ...........। (अपठम्-अपठत्-अपठन्)

२. सिंहः वने ...........। (गजसि-गर्जति-गजामि)

३. गगने मेघाः ...........। (चलन्ति-चलावः-चलतु)

४. अहं पूजाम् ...........। (अकरोत्-कुरु-अकरवम्)

५. त्वं गृहं ...........। (गच्छ-गच्छतु-गच्छानि)

**III. पुरुषानुगुणम् अधोनिर्दिष्टानि रूपाणि विभजत ।**

अगायताम् - शोभते - पठन्तु - लिखति

धावसि - करोति - अपठः - चोरयन्ति

नृत्यामि - अक्रीडाम - वन्देथे - गच्छतम्

वदावः - ताडयन्ति - खादन्ति - नयताम्

| प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|
| | | |

@KTBS NOT TO BE REPUBLISHED

**IV. संयोजयत ।**

| अ | आ | उत्तराणि |
|---|---|---|
| अहम् | गायति | ............ |
| त्वम् | गच्छामः | ............ |
| गौरी | पठ | ............ |
| माधवः | लिखथ | ............ |
| वयम् | अपिबम् | ............ |
| यूयम् | खादति | ............ |

*****

## दशमः पाठः

# प्रबन्धः

P3N5Y8

प्रकृष्टो बन्धः प्रबन्धः इत्युच्यते । निबन्धः इति अस्य नामान्तरम् । नातिविस्तृतः नातिसङ्क्षिप्तरूपो प्रबन्धः लघुप्रबन्धः इति कथ्यते । प्रबन्धे सरलानि वाक्यानि अपेक्षितानि । मुख्यतया प्रबन्धाः वर्णनात्मकाः, विचारात्मकाः, आख्यानात्मकाः, व्याख्यानात्मकाः चेति चतुर्धा विभक्ताः । आभाणकादिभिः प्रबन्धाः आकर्षकाः भवन्ति । एतान् सर्वान् अंशान् मनसि निधाय छात्रैः प्रबन्धाः रचनीयाः ।

प्रबन्धे प्रस्तावना, विषयनिरूपणम्, उपसंहारश्चेति निरूपणक्रमः अपेक्षितः । प्रस्तावनायां प्रबन्धविषयस्य उपक्रमः, विषयनिरूपणभागे विषयस्य विस्तारः, उपसंहारभागे प्रबन्धविषयस्य सारांशः च भवेत् । प्रबन्धे वाक्यानां परस्परसम्बन्धः आवश्यकः । उदाहरणार्थम् अत्र केचन प्रबन्धाः प्रदत्ताः ।

@KTBS NOT TO BE REPUBLISHED

### १. देशभक्तिः

बाल्ये एव देशभक्तिविषये आसक्तिः भवेत्। वयं 'मातृदेवो भव' इति उपनिषद्वाक्यं स्मरन्तः मातरं प्रणमामः। तद्वत् 'भारतमाता' अपि अस्माकं जननी अस्ति। अतः 'भारतमातुः' पूजा करणीया। अस्मासु देशभक्तिः सदा भवेत्। अस्माकं गृहस्य रक्षणं यथा प्रमुखं तथैव देशरक्षणम् अपि अस्माकं महत्त्वभूतं कार्यम्। प्रथमं देशहितचिन्तनं, ततः स्वहितचिन्तनम्। एवम् अस्माकं धारणा भवेत्।

### २. ग्रन्थालयः

ग्रन्थालयः छात्राणां ज्येष्ठानां सर्वेषामपि देवमन्दिरम् इव अस्ति। पुस्तकस्य पठनेन व्यक्तित्वविकासः भवति। ग्रन्थालये विज्ञानम्, भाषा, गणितम्, इतिहासः, कथाः, नाटकम् एवं सर्वविषयकाः ग्रन्थाः भवन्ति। दिनपत्रिकाः अपि भवन्ति। दिनपत्रिकापठनेन देश-विदेशस्य वार्ताः ज्ञायन्ते। ग्रन्थालयस्य उपयोगः छात्रैः करणीयः। नगरेषु ग्रामेषु सर्वत्रापि ग्रन्थालयः भवति।

## ३. विद्यालयप्रवासः

अस्माकं विद्यालये प्रतिवर्षं विद्यालयप्रवासः भवत्येव। देशसञ्चारः करणीयः कोषः पठनीयः इत्युक्तिः प्रसिद्धा अस्ति। अतः प्रायः सर्वत्र शालासु शैक्षणिक-प्रवासः क्रियते।

अहं प्रवासं बहु इच्छमि। यतः तत्र मित्रैः सह क्रीडितुं शक्यते । यदि जलं भवति, तर्हि जले अपि क्रीडामि।

ऐतिहासिकं स्थलं, जलबन्धः, देवालयः, एवं विविधेषु प्रदेशेषु प्रवासः क्रियते। कदाचित् दिनत्रयस्य पञ्चदिनानाम् एकदिनस्य वा प्रवासः भवति। विद्यार्थिजीवने कृतस्य प्रवासस्य स्मरणं अग्रेऽपि अवश्यं भवति। अस्माकं कर्णाटकराज्ये बेलूरु, हळेबीडु, मैसूरु, उडुपि, कोल्लूरु, पम्पाक्षेत्रम्, चित्रदुर्गः - एवं प्रसिद्धप्रवास- स्थानानि सन्ति। मया सह मित्राणि मम गुरवः च आगच्छन्ति। गुरवः प्रवासस्य महत्त्वं कथयन्ति। ते इतिहासस्य वैशिष्ट्यं वर्णयन्ति।

@KTBS NOT TO BE REPUBLISHED

## ४. रामायणम्

रामायणं श्रेष्ठम् आदिकाव्यम् । अस्य रचयिता श्रीवाल्मीकिमहर्षिः । रामायणे सप्त काण्डाः सन्ति। अस्मिन् काव्ये श्रीरामकथा वर्णिता अस्ति।

श्रीरामः आदर्शपुरुषः, पितृवाक्यपरिपालकः च आसीत्। सः वनं गत्वा चतुर्दश वर्षाणि उषितवान्। राक्षसानां हननं कृतवान्च। रावणः सीतायाः अपहरणं कृतवान् । आञ्जनेयः सीतायाः अन्वेषणं कर्तुं समुद्रस्य उल्लङ्घनं कृतवान् । श्रीरामरावणयोः मध्ये घोरयुद्धं जातम् । रामेण रावणः हतः। एवं दुष्टानां दण्डनं शिष्टानां रक्षणं च श्रीरामस्य जीवनलक्ष्यम् आसीत् ।

श्रीरामः त्यागमयः आसीत्। प्राप्तस्य राज्यस्य त्यागं कृत्वा सः वनं गतवान्। प्रजासु सन्देहः न भवेत् इति पत्नीं सीतादेवीं वनं प्रति प्रेषितवान्। एवं श्रीरामस्य आदर्शगुणाः सर्वैः अनुकरणयोग्याः सन्ति।

*****

## एकादशः पाठः

# अनुवादः

T4E6F1

1. ಹುಡುಗನು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾನೆ. ಅಲ್ಲಿ ಅವನು ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸುತ್ತಾನೆ. ಶ್ರದ್ಧೆಯಿಂದ ಪಾಠಗಳನ್ನು ಕೇಳುತ್ತಾನೆ. ಜೀವನದಲ್ಲಿ ಉತ್ತಮ ನಾಗರಿಕನಾಗುತ್ತಾನೆ.

२. जलपूर्णः मेघः आकाशे गर्जति। मेघस्य गर्जनं श्रुत्वा मयूराः नृत्यन्ति। जलधरः जलेन भूमिं सिञ्चति। कृषिकाः अपि सन्तुष्टाः भवन्ति।

3. ನಾನು ಎಂಟನೆಯ ತರಗತಿಯ ವಿದ್ಯಾರ್ಥಿಯಾಗಿದ್ದೇನೆ. ನಾನು ಪ್ರತಿದಿನ ಬೆಳಿಗ್ಗೆ 5.00 ಘಂಟೆಗೆ ಏಳುತ್ತೇನೆ. ಯೋಗಾಸನ ಮತ್ತು ದೇವರ ಪೂಜೆಯನ್ನು ಮಾಡುತ್ತೇನೆ. –ತಾಯಿತಂದೆಯರಿಗೆ ವಂದಿಸಿ ಶಾಲೆಗೆ ಹೋಗುತ್ತೇನೆ.

४. भारते बह्व्यः नद्यः प्रवहन्ति। अत्र बहूनि पुण्यक्षेत्राणि सन्ति। अतः भारतं पुण्यभूमिः इति प्रसिद्धम् अस्ति। वयं सर्वे भारतीयाः।

5. ಮಕ್ಕಳು ಕ್ರೀಡಾಂಗಣದಲ್ಲಿ ಆಟವಾಡುತ್ತಾರೆ. ಆಟದಿಂದ ಆರೋಗ್ಯವು ಹೆಚ್ಚುತ್ತದೆ. ಓದುವುದರಿಂದ ಬುದ್ಧಿ ವಿಕಾಸವಾಗುತ್ತದೆ. ಆದ್ದರಿಂದ ಜೀವನದಲ್ಲಿ ಓದುವುದು ಮತ್ತು ಆಟವಾಡುವುದು ಮುಖ್ಯವಾಗಿದೆ.

६. संस्कृते बहूनि काव्यानि सन्ति। तेषु 'रामायणम्' 'महाभारतम्' च प्रसिद्धे काव्ये। रामायणस्य कर्ता वाल्मीकिः। महाभारतस्य कर्ता वेदव्यासः।

7. ಭಾರತೀಯರ ಪವಿತ್ರ ಗ್ರಂಥ ಭಗವದ್ಗೀತೆ. ಭಗವದ್ಗೀತೆಯನ್ನು ಪಠಿಸುವುದರಿಂದ ನಮ್ಮ ಮನಸ್ಸಿಗೆ ಶಾಂತಿ ದೊರೆಯುತ್ತದೆ. ಆದ್ದರಿಂದ ನಾವು ಪ್ರತಿದಿನವೂ ಅದನ್ನು ಓದುತ್ತೇವೆ.

८. महाभारतं कौरवपाण्डवानां कथा। अत्र अवतारपुरुषस्य श्रीकृष्णस्य कथा, विदुरोपदेशः, भीष्मोपदेशः च प्रसिद्धाः अंशाः।

*****

@KTBS NOT TO BE REPUBLISHED

लङ्लकारः

सप्तमीविभक्तिः

द्वादशः पाठः

# चतुरः कालिदासः



**पीठिका-**

[संस्कृतकविषु अग्रगण्यः कालिदासः कविकुलगुरुः कविता- कामिन्याः विलासः इति च प्रसिद्धः **आसीत्**।

यद्यपि कालिदासः प्रख्यातः तथापि तस्य देशकालादीनां विषये किञ्चिदपि न ज्ञायते इदम् अस्माकं दौर्भाग्यम्। सः भारतदेशे सर्वत्र सञ्चारं कृत्वा उज्जयिन्यां दीर्घकालं **अवसत्** इति ऊहा अस्ति। कालिदासविरचिताः अनेके ग्रन्थाः सन्तीति विमर्शकाः कथयन्ति। परन्तु तेषु सप्त ग्रन्थाः एव कालिदासेन विरचिताः इति निस्संशयं पण्डितैः दृढीकृताः। ते च रघुवंशं, कुमारसंभवम् इति द्वे महाकाव्ये,

मेघदूतम्, ऋतुसंहारः च इति द्वे खण्डकाव्ये, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं चेति त्रीणि नाटकानि।

कालिदासः विक्रमादित्यस्य आस्थाने कविः **आसीदिति** ज्ञायते। भरतवर्षे विक्रमनाम्नि अनेके राजानः **आसन्**। अतः कालिदासेन वर्णितः विक्रमराजः कः? अस्य निर्धारणं दुष्करम् अस्ति। परन्तु कालिदासः भोजराजस्य आस्थाने **आसीत्,** तत्र विद्वद्गोष्ठीषु समस्याः पूरयति स्म इति ऐतिह्यं क्रिस्ताब्दे षोडशशतके स्थितेन वङ्गदेशीयेन बल्लालसेनेन विरचिते भोजप्रबन्धग्रन्थे कथितम्।]

अस्माकं भारतदेशे बहवः जनप्रियाः प्रजारञ्जकाः च भूपालाः **आसन्** । तेषु अन्यतमः भोजो नाम राजा धारानगरे **आसीत्** । भोजस्य आस्थाने बहवः कवयः, पण्डिताः, गायकाः च **आसन्**। तेषु 'कविकुलगुरुः' इति प्रसिद्धः कालिदासनामकः कविः अपि अन्यतमः । सः स्वपाण्डित्येन भोजस्य आस्थाने शोभते स्म ।

एकदा भोजराजः मृगयार्थं वनम् **अगच्छत्** । तत्र कस्यचित् सरोवरस्य पार्श्वे जम्बूपादपाः बहवः **आसन्** । वृक्षेषु कपयः शाखाभ्यः शाखान्तरं प्रति लङ्घनं कुर्वन्तः क्रीडन्ति स्म । तदा 'गुलु-गुलु' इति शब्दः भवति स्म। एतस्मात् प्रभावितः भोजः स्वस्य आस्थाने 'गुलु गुग्गुलु गुग्गुलु' इति समस्यां दत्त्वा 'यः अनेन श्लोकं रचयित्वा श्वः वाचयिष्यति, तस्मै पारितोषिकं दास्यते' इति **अवदत्**।

सर्वे कवयः अनन्तरदिने राजसभां समागत्य चिन्ताकुलाः अधोमुखाः च **अतिष्ठन्** । तदा कालिदासः स्वपीठात् उत्थाय श्लोकम् एवम् **अपठत्** -

"जम्बूफलानि पक्वानि पतन्ति विमले जले।
कपिकम्पितशाखाभ्यः गुलु गुग्गुलु गुग्गुलु।।"

इदं श्रुत्वा सर्वे कवयः सन्तुष्टाः **अभवन्** । भोजः अपि सन्तुष्टः सन् कालिदासाय पारितोषिकम् **अयच्छत्**।

NOT TO BE REPUBLISHED @KTBS

अन्यस्मिन् दिने भोजराजः स्वस्य आस्थाने कवीन् आहूय **अवदत्** - 'क-ख-ग-घ' इत्येतान् वर्णान् आश्रित्य श्लोकं रचयन्तु' इति। सर्वे कवयः समस्यामिमां पूरयितुं प्रयत्नम् **अकुर्वन्** । किन्तु ते समस्यापूरणे विफलाः जाताः ।

एकदा कालिदासः कालीमन्दिरं प्रति गच्छन् **आसीत्** । तदा सः काञ्चित् बालिकाम् **अपश्यत्** । सा बालिका कालिदासं दृष्ट्वा प्रणामम् **अकरोत्** । तदा तयोः मध्ये एवं संवादः **प्रावर्तत।**

कालिदासः - का त्वं बाले ?

बालिका - काञ्चनमाला ।

कालिदासः - कस्याः पुत्री ?

बालिका - कनकलतायाः

कालिदासः - हस्ते किं ते ?

बालिका - तालीपत्रम्

कालिदासः - का वा रेखा?

बालिका - क - ख - ग - घ ।

ततः कालिदासः भोजस्य आस्थानम् आगत्य समस्याम् **अपूरयत्**-

का त्वं बाले ? काञ्चनमाला

कस्याः पुत्री ? कनकलतायाः ।

हस्ते किं ते ? तालीपत्रम्

का वा रेखा ? क - ख - ग - घ ।।

एतं श्लोकं श्रुत्वा सर्वे आश्चर्ययुक्ताः **अभवन्** । यथापूर्वं 'कविकुलगुरुः' इति कालिदासस्य प्रशंसाम् **अकरोत्,** पारितोषिकं च **प्रायच्छत्।**

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत -**

१. धारानगरस्य राजा कः ?

२. 'कविकुलगुरुः' इति कः प्रसिद्धः ?

३. भोजराजः मृगयार्थं कुत्र अगच्छत् ?

४. बालिकायाः हस्ते किम् आसीत् ?

**२. रिक्तस्थानानि पूरयत।**

१. कालिदासः .............. प्रति गच्छन् आसीत्।

२. श्लोकं श्रुत्वा सर्वे .............. अभवन्।

**३. समानार्थकपदानि लिखत।**

१. भूपालः २. प्रसिद्धः ३. पण्डितः ४. वृक्षः

**४. अन्यलिङ्गपदं लिखत।**

१. सः २. बालिका ३. कविः ४. अन्यतमः

**५. वाक्यानि रचयत।**

१. आस्थाने २. राजा ३. क्रीडन्ति

**६. आम् / न इति लिखत।**

१. भारतदेशे बहवः भूपालाः आसन्।

२. भोजः कलहेन कालं यापयति स्म।

३. कालिदासः कविकुलगुरुः इति प्रसिद्धः।

NOT TO BE REPUBLISHED @KTBS

४. एकदा भोजराजः मृगयार्थं ग्रामम् अगच्छत्।

५. कवयः राजसभां समागत्य ऊर्ध्वमुखाः अतिष्ठन्।

**७. पञ्चषैः वाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत।**

१. कालिदासः 'कविकुलगुरुः' इति कथं प्रसिद्धः अभवत् इति विवृणुत।

## क्रियाकलापः

**I. एकवचने लिखत।**

| | | |
|---|---|---|
| उदाहरणम् → | आसन् | आसीत् |
| | अभवन् | |
| | अगच्छन् | |
| | अयच्छन् | |
| | अपूरयन् | |
| | अतिष्ठन् | |

@KTBS NOT TO BE REPUBLISHED

**II. नामपदं - क्रियापदं च पृथक् कुरुत।**

| | | | | |
|---|---|---|---|---|
| पण्डिताः | - | शोभते | - | बालिकाम् |
| कपयः | - | श्लोकम् | - | अवदन् |
| दीयते | - | शाखाः | - | प्रायच्छत् |

उदाहरणम् → भूपालः = नामपदम् ; अनमत् - क्रियापदम्

| कर्तृपदम् | क्रियापदम् |
|---|---|
| | |
| | |
| | |
| | |
| | |

**III. समूहेतरं पदं लिखत।**

अकरोत् - सन्तुष्टः - अपश्यत् - अवदत् =

राजा - कालिदासः - पार्थिवः - भूपालः =

आहत्य - दृष्ट्वा - श्लोकम् - श्रुत्वा =

दीयते - कवीन् - पण्डिताः - बालिकाम् =

**IV. इतरवचनद्वयं लिखत।**

१. ............. ............. पादपाः।

२. जम्बूफलम् ............. .............।

३. ............. ............. वृक्षेषु।

४. कविः ............. .............।

५. ............. शाखाभ्याम् .............।

© KTBS NOT TO BE REPUBLISHED

**V. महेशः कश्चन बालः। तस्य कस्मिन् कीदृशः भावः अस्ति इति अत्र प्रदर्शितम्।**

**तदनुगुणं वाक्यानि रचयत।**

उदा - जनकः - श्रद्धा। महेशस्य जनके श्रद्धा अस्ति।

१. अम्बा प्रीतिः। ________________

२. अनुजः स्नेहः। ________________

३. ज्येष्ठाः आदरः। ________________

४. दरिद्राः कारुण्यम्। ________________

५. सचिवाः आदरः। ________________

**VI. सप्तम्यन्तेन पदेन रिक्तस्थानं पूरयत।**

@KTBS NOT TO BE REPUBLISHED

१. नारदः __________ सञ्चरति। (लोकाः)

२. छात्राः __________ भवन्ति। (विद्यालयाः)

३. पुष्पाणि __________ सन्ति। (माला)

४. बालकाः __________ मग्नाः सन्ति। (कार्याणि)

५. प्राणिनः __________ भवन्ति। (वनम्)

**VII. सप्तम्यन्तानि पदानि चिनुत।**

| | | |
|---|---|---|
| उद्यानेषु, | वनाय, | लतायाम् |
| कथासु, | छात्रयोः, | देशस्य |
| विद्यायाम्, | तैलेषु, | कलायाः |
| दीपात्, | रथानाम्, | देवतासु |
| __________ | __________ | __________ |
| __________ | __________ | __________ |
| __________ | __________ | __________ |

## VIII. उदाहरणानुगुणं वाक्यानि रचयत ।




उदा - सर्पः बिलेषु सञ्चरति ।

**उत्तराणि चित्वा कोष्ठके लिखत ।**

← मीनाः अत्र सन्ति ।

← विग्रहः अत्र अस्ति ।

← पुस्तकानि अत्र सन्ति ।

← कौरवपाण्डवानां कथा अस्ति ।

← रामस्य कथा अत्र अस्ति ।

← मुखम् अत्र पश्यामः ।

← क्रूरमृगाः अत्र सन्ति ।



| | | | | | | |
|---|---|---|---|---|---|---|
| महाभारते | दर्पणे | वने | रामायणे | ग्रन्थालये | मन्दिरे | जले |

*****

@KTBS NOT TO BE REPUBLISHED

# १. भिक्षुकस्य स्वप्नः



१. कश्चित् ग्रामः। तस्मिन् ग्रामे कश्चित् भिक्षुकः वसति। सः प्रतिदिनं भिक्षाटनेन जीवनं यापयति। कदाचित् सः भिक्षुकः प्रातः आरभ्य भिक्षायाचनं कृत्वा सायं ग्रामस्य धर्मशालाम् अगच्छत्। तस्मिन् दिने लब्धम् आहारम् आकण्ठं भुक्त्वा तत्रैव शयनम् अकरोत्। सुखनिद्रायां तस्य स्वप्नः एवं प्रवर्तते।

२. तस्य राज्यस्य अपुत्रः महाराजः मरणं प्राप्स्यति। तस्य मरणानन्तरं राज्यस्य उत्तराधिकारं कः स्वीकरिष्यति इति चर्चा भविष्यति। तत्र आस्थानपण्डिताः कवयः ज्येष्ठाः इत्यादयः उपस्थिताः भविष्यन्ति। सर्वे चर्चां कृत्वा एवं निर्णयं करिष्यन्ति - ''गजाय मालां दत्त्वा प्रेषयिष्यामः। सः गजः यस्य कण्ठे मालाम् अर्पयिष्यति, सः एव अस्य राज्यस्य महाराजः भविष्यति'' इति। ततः सर्वे गजाय मालां दत्त्वा प्रेषयिष्यन्ति। सः गजः मालां स्वीकृत्य सर्वत्र अटनं करिष्यति। अन्ते सः भिक्षुकस्य समीपम् आगमिष्यति। तस्य कण्ठे मालाम् अर्पयिष्यति च।

३. राज्ये सर्वे जनाः ''एषः एव इतः परं राज्ये सर्वान् पालयिष्यति'' इति घोषणं करिष्यन्ति। अनन्तरं सर्वे वाद्यघोषेण सह भिक्षुकं राजभवनं नेष्यन्ति,

©KTBS NOT TO BE REPUBLISHED

पट्टाभिषेकं करिष्यन्ति च। तदनन्तरं महाराजस्य पुत्रीम् अस्मै दत्त्वा विवाहं करिष्यन्ति। सः पुत्रं पुत्रीं च लब्ध्वा सुखेन जीवनं यापयिष्यति।

४. कतिपयवर्षाणाम् अनन्तरं पुत्रस्य पुत्र्याः च विवाहार्थं सिद्धतां करिष्यन्ति। विवाहावसरे पुरजनाः बान्धवाः च एकत्र मेलिष्यन्ति। सर्वेषां दर्शनेन महाराजः अपि सन्तोषम् अनुभविष्यति।

५. तदा कश्चित् सैनिकः वेगेन आगमिष्यति, कथयिष्यति च - ''महाराज! अनेके शत्रवः युद्धार्थम् आगताः सन्ति'' इति। तदा महाराजः कोपेन उच्चैः आक्रन्दनं करिष्यति। तावता भिक्षुकस्य जागरणं भविष्यति। यदा सः नेत्रे उन्मीलयति तदा पूर्वस्यां दिशि सूर्यस्य प्रकाशं पश्यति। सूर्यदेवं नमस्कृत्य स्वकार्यस्य भिक्षाटनस्य आरम्भं करोति।

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**I. पञ्चषैः वाक्यैः कर्णाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१. भिक्षुकः कथं राजा अभवत् ?

२. भिक्षुकः स्वप्ने किं किं चिन्तयति ?

*****

# २. अक्कमहादेवी (११३०-११६०)

महादेवी कर्णाटकस्य शिवमोग्गमण्डलस्य शिकारिपुरोपमण्डलस्य 'उडुतडि' इति ग्रामे प्रायः क्रि.श. ११३० तमे वर्षे अजायत । तस्याः पिता निर्मलशेट्टि माता च सुमतिः सद्गुणसम्पन्ना एषा बाल्ये एव पूजादिषु धार्मिककार्येषु निमग्ना अभवत्।

महादेवी अप्रतिमसुन्दरी आसीत् । तस्याः सौन्दर्येण आकृष्टः राजा कौशिकः तां परिणेतुं मनश्चकार । परन्तु चेन्नमल्लिकार्जुनमेव स्वपतिं मन्यमाना सा राज्ञः आशयं तिरस्कृतवती । किन्तु तस्याः पितरौ राज्ञः भीतौ कौशिकं परिणेतुं ताम् आदिष्टवन्तौ । अनन्यशरणा महादेवी कौशिकं परिणेतुम् अङ्गीचकार । किन्तु सा निर्बन्धत्रयं तस्य पुरतः निर्दिष्टवती । किन्तु कौशिकः निर्बन्धत्रयस्य उल्लङ्घनं कृतवान् ।

तदा महादेवी कौशिकं परित्यज्य राजभवनात् बहिर्गतवती । ततः साक्षात् कल्यणनगरीं प्रविष्टवती । तत्र अल्लमप्रभोः आध्यक्ष्ये निर्मिते अनुभवमण्डपे अध्यात्मविषयान् लोकेभ्यः उपदिदेश ।

NOT TO BE REPUBLISHED ©KTBS

महदेव्याः कठिनतमं वैराग्यम् अवलोक्य मूकविस्मिताः अल्लमप्रभुबसवादिशरणाः ताम् 'अक्क' 'वैराग्यनिधिः' इति सम्बोधितवन्तः। कालान्तरे सा श्रीशैलम् आगत्य तत्र समीपे कदलीवने चेन्नमल्लिकार्जुनस्य दर्शनं स्वीकृतवती। ततः तत्र समीपे कदलीवने चेन्नमल्लिकार्जुने ऐक्यङ्गता।

'योगाङ्गत्रिविधिः', 'सृष्टिय वचन', 'मन्त्रगौप्य' इति तिस्रः कृतीः अक्कम हादेवी अरचयत्। 'चेन्नमल्लिकार्जुन' इति अङ्कितनाम्ना इयं बहूनि वचनानि रचितवती । एतानि च भक्तिभावपूर्णानि बोधप्रदानि च वर्तन्ते । अत्रैकम् उदाहरणम्-

'बेट्टद मेलोन्दु मनेय माडि मृगगळिगञ्जिदोडेन्तय्य।

समुद्रद तडियलोंदु मनेय माडि नोरेतेरेगळिगञ्जिदोडेन्तय्य।

सन्तेयोळोन्दु मनेय माडि शब्दक्के नाचिदोडेन्तय्य।

चेन्नमल्लिकार्जुनदेव केळय्य । लोकदोकोळगे हुट्टिद बळिक

स्तुति निन्दनेगळु बन्दडे मनदल्लि कोपवताळदे समाधानियागिरबेकु ।।

अस्य सारांशः अयम्-

पर्वताग्रे यदि गृहं क्रियते तर्हि मृगेभ्यः न भेतव्यम् ।

समुद्रतीरे यदि गृहं क्रियते तर्हि जलतरङ्गेभ्यः न भेतव्यम्।

विपण्यां यदि गृहं क्रियते तर्हि शब्देभ्यः न भेतव्यम् ।

लोके जननात् अनन्तरं स्तुतिनिन्दाभ्यां मनसि कोपो माभूत् समाधानी च भवेत् ।

**I. पञ्चषैः वाक्यैः कर्णाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१. किमर्थं महादेवी कौशिकं परिणेतुम् अङ्गीचकार ?

२. महादेवी कदा कौशिकं परित्यज्य बहिः गतवती?

*****

@KTBS NOT TO BE REPUBLISHED

परिशिष्टम्

# १. वाक्यरचना कौशलम्

सूर्योदयः



NOT TO BE REPUBLISHED

✻ उदाहरण वाक्यं पठित्वा, मञ्जूषातः पदं चित्वा रिक्तस्थानम् पूरयत-

उदा : सूर्योदयः रमणीयः अस्ति।

१) सूर्यः ___________ दिशि उदेति।

२) प्रभाते किरणाः ___________ भवन्ति।

३) सूर्यकिरणाः ___________ विकासयन्ति ।

४) सूर्यनमस्कारः ___________वर्धयति ।

| आरोग्यम्, पुष्पाणि, रक्तवर्णे, पूर्वस्यां |
|---|

दीपावली



✻ मञ्जूषातः पदं चित्वा वाक्यानि रचयत-

| धार्मिकोत्सवः, बालकः, गृहम्, वृक्षः, दीपाः, लक्ष्मीपूजा |
|---|

## गौतम बुद्धः



✻ चित्रं दृष्ट्वा वाक्यानि रचयत।



©KTBS Not to be republished

## ग्रामः



✻ चित्रं दृष्ट्वा वाक्यानि रचयत।

@KTBS
BE REPUBLISHED

## नदी



✻ चित्रं दृष्ट्वा वाक्यानि रचयत।

## २. पदकोशः

| | | |
|---|---|---|
| धीमन्तः | ಬುದ್ಧಿಶಾಲಿಗಳು | Intelligent Wise |
| पतिः | ಗಂಡ | Husband |
| कृपया | ದಯವಿಟ್ಟು | Please |
| पाणिग्रहणम् | ವಿವಾಹ (ಮದುವೆ) | Marriage, Wedding |
| निःस्पृहः | ನಿಃಸ್ವಾರ್ಥಿ | Selfless |
| शकटमार्गः | ಗಾಡಿ ಸಂಚರಿಸುವ ದಾರಿ | Cart Street |
| धनाढ्यः | ಶ್ರೀಮಂತ | Rich, Wealthy |
| कृपणः | ಜಿಪುಣ | Miser |
| आदरः | ಗೌರವ | Respect, Honour |
| प्रथितः | ಪ್ರಸಿದ್ಧ | Famous, Well-known |
| कुलीनः | ಸಜ್ಜನ, ಸತ್ಕುಲದಲ್ಲಿ ಹುಟ್ಟಿದವ | Noble, Born in noble family |
| ज्ञाति | ಬಂಧು, ಸಂಬಂಧಿ | Relative |
| सोमः | ಚಂದ್ರ | Moon |
| प्रभाकरः | ಸೂರ್ಯ | Sun |
| उदर वेदना | ಹೊಟ್ಟೆನೋವು | Stomachache |
| ह्यः | ನಿನ್ನೆ | Yesterday |
| खाद्यम् | ತಿಂಡಿ | Eatable |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| पङ्कः | ಕೆಸರು | Dirt Mud |
| वरम् | ಉತ್ತಮ, ಯೋಗ್ಯ | Good |
| भेषजः | ಔಷಧಿ | Medicine |
| पथ्यम् | ಹಿತಾಹಾರ | Diet |
| तक्रम् | ಮಜ್ಜಿಗೆ | Buttermilk |
| मेधा | ಬುದ್ಧಿ | Wisdom |
| कृष्णः | ಕಪ್ಪು | Black |
| उत्सवः | ಹಬ್ಬ | Festival |
| पिकः | ಕೋಗಿಲೆ | Cuckoo |
| व्यसनम् | ದುಶ್ಚಟ | Vice |
| श्रोत्रियः | ವೈದಿಕ, ವೇದಪಂಡಿತ | Learned in Vedas, Vedic Pandit |
| दुर्भिक्षः | ಬರಗಾಲ | Famine |
| अर्थ | ಹಣ, ಸಂಪತ್ತು | Wealth |
| क्षपणकः | ಜೈನ/ಬೌದ್ಧ ಸಂನ್ಯಾಸಿ | Jain Monk |
| वणिक् | ವ್ಯಾಪಾರಿ | Merchant |
| उपायनम् | ಕಾಣಿಕೆ | Gift |
| नापितः | ಕ್ಷೌರಿಕ | Barber |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| कनकम् | ಬಂಗಾರ | Gold |
| निर्धनः | ಬಡವ | Poor |
| खिन्नाः | ದುಃಖಿತ | Sad, Worried |
| निधिः | ಸಂಪತ್ತು | Wealth |
| पुरजनाः | ಊರಿನವರು | Citizen |
| उन्मीलयति | ತೆರೆಯುತ್ತಾನೆ | Opens |
| पन्नगः | ಸರ್ಪ | Serpent, Snake |
| जिह्वा | ನಾಲಿಗೆ | Tongue |
| आत्मजा | ಮಗಳು | Daughter |
| रुद्रः | ಶಿವ | Shiva |
| अनिलः | ಗಾಳಿ | Wind, Air |
| अर्कः | ಸೂರ್ಯ | Sun |
| परिष्कुर्वन्ति | ಸ್ವಚ್ಛ ಮಾಡುತ್ತಾರೆ | Clean (V) |
| आपणः | ಅಂಗಡಿ | Shop |
| नूतनम् | ಹೊಸ | New |
| स्फोटकम् | ಪಟಾಕಿ | Cracker |
| आवली | ಸಾಲು | Series |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| जलतृष्णा | ದಾಹ, ಬಾಯಾರಿಕೆ | Thirst |
| झटिति | ಬೇಗನೆ | Suddenly |
| बहिः | ಹೊರಗೆ | Out side |
| विकलाङ्गः | ಅಂಗಹೀನ | Handicapped |
| उषित्वा | ವಾಸಿಸಿ | Having Resided |
| योगदानम् | ಕೊಡುಗೆ | Contribution |
| भौतशास्त्रम् | ಭೌತಶಾಸ್ತ್ರ | Physics |
| पिपासा | ಬಾಯಾರಿಕೆ | Thirst |
| रसतन्त्रम् | ರಸಾಯನಶಾಸ್ತ್ರ | Chemistry |
| शुष्कपर्णम् | ಒಣಗಿದ ಎಲೆ | Dry leaf |
| योजनम् | ಸುಮಾರು 12 ಕಿ.ಮೀ. ದೂರ | About 12 k.ms. distance |
| कलत्रम् | ಹೆಂಡತಿ | Wife |
| चारु | ಸುಂದರ, ಉತ್ಕೃಷ್ಟ | Beautiful |
| अङ्घ्रिः | ಪಾದ, ಕಾಲು | foot |
| पौत्रः | ಮೊಮ್ಮಗ | Grand Son (Son's son) |
| अरविन्दः | ಕಮಲ | Lotus |
| चित्तम् | ಮನಸ್ಸು | Mind |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| भोगः | ಸುಖ | Enjoyment |
| वाजी | ಕುದುರೆ | Horse |
| वित्तम् | ಹಣ | Money |
| वाञ्छितम् | ಮನಸ್ಸಿನ ಬಯಕೆ | Wants, Disires |
| तटः | ದಡ | Bank, Shore |
| तरुः | ಮರ | Tree |
| खगः | ಪಕ್ಷಿ | Bird |
| सहपाठी | ಜೊತೆಯಲ್ಲಿ ಓದುವವ | Classmate |
| ग्रीष्मऋतुः | ಬೇಸಿಗೆ ಕಾಲ | Summer Season |
| निरामयः | ಆರೋಗ್ಯವಂತ | Healthy Man |
| कृषकः | ರೈತ | Farmer |
| पितृव्यः | ಚಿಕ್ಕಪ್ಪ | Uncle |
| सुकृतिः | ಉತ್ತಮಕಾರ್ಯ | Noble deed |
| जरा | ಮುಪ್ಪು | Old age |
| पर्वदिनम् | ಹಬ್ಬ | Festive day |
| विघ्नम् | ತೊಂದರೆ | Obstacle |
| क्षिप्त्वा | ಎಸೆದು | Having thrown |

NOT TO BE REPUBLISHED @KTBS

| | | |
|---|---|---|
| वत्सः | ಪುತ್ರ | Son |
| अपुत्रः | ಮಕ್ಕಳಿಲ್ಲದವನು | Childless |
| ज्येष्ठः | ಹಿರಿಯ | Eldest |
| घोषः | ಶಬ್ದ | Noise, Sound |
| नृपः | ಅರಸ, ರಾಜ | King |
| प्रतिवेशी | ನೆರೆಯ | a neighbour |
| भीरुः | ಹೇಡಿ, ಅಂಜುಬುರುಕ | Coward |
| नितराम् | ಪೂರ್ಣವಾಗಿ (ಬಹಳ) | Completely |
| मुहूर्तम् | ಕ್ಷಣ, ಅಲ್ಪಕಾಲ | Short while |
| धूमः | ಹೊಗೆ | Smoke |
| चिरम् | ಬಹಳಕಾಲ | For long |
| शत्रुः | ವೈರಿ | Enemy |
| विचक्षणः | ಜ್ಞಾನಿ, ಬುದ್ಧಿವಂತ | learned; scholar |
| ग्लानिः | ನಾಶವಾಗುವುದು | decay, decline |
| सङ्गः | ಪ್ರೀತಿ / ಆಸಕ್ತಿ | attachment |
| ध्रुवम् | ನಿಶ್ಚಯ | Certain |
| सम्मोहः | ಸಮ್ಮೋಹ | delusion |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| विभ्रमः | ದಿಗಿಲು | Fix, Confusion |
| उदासीनः | ನಿಷ್ಪಕ್ಷಪಾತಿ | unconcerned |
| गतव्यथः | ದುಃಖ ಇಲ್ಲದಿರುವವನು | free of agony |
| स्मृतिः | ನೆನಪು | Memory |
| अनपेक्षः | ಆಸೆ ಇಲ್ಲದವನು | Free of wants |
| अजस्रम् | ನಿರಂತರ, ಎಡಬಿಡದೆ | Continuously, Constant |
| पूता | ಶುದ್ಧ, ಪವಿತ್ರ | Holified, Sanshified |
| हासः | ನಗು | Laughter |
| तन्द्रा | ಸೋಮಾರಿತನ, ಆಲಸ್ಯ | Lethargy |
| मृगया | ಬೇಟೆ | Hunting |
| तालीपत्रम् | ತಾಳೆಗರಿ | Palm leaf |
| जम्बूपादपः | ನೇರಳೇ ಮರ | Roseapple tree |
| शाखा | ಟೊಂಗೆ, (ಕೊಂಬೆ) | Branch |
| लङ्घनम् | ಹಾರು | Jump |
| पक्वम् | ಬಲಿತ, ಮಾಗಿದ | Riped |
| विमलम् | ಶುದ್ಧ | Pure |

@KTBS NOT TO BE REPUBLISHED

# ३. प्रश्नपत्रिका स्वरूपम् - अङ्काः-४०

## सङ्कलनात्मकमौल्यमापनम्-०१

| | | |
|---|---|---|
| ✻ | समुचितम् उत्तरं क्रमाक्षरेण सह चित्त्वा लिखत । | 5×1=5 |
| ✻ | एकवाक्येन उत्तरं लिखत । | 5×1=5 |
| ✻ | श्लोकतात्पर्यं संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत । | 1×2=2 |
| ✻ | कवेः देश-काल-ग्रन्थानां विषये लिखत । | 1×2=2 |
| ✻ | आम्/ न इति लिखत । | 1×2=2 |
| ✻ | चतुर्थं पदं लिखत । | 1×2=2 |
| ✻ | रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत । | 1×2=2 |
| ✻ | पद्यं पूरयत । | 1×2=2 |
| ✻ | निर्देशानुसारम् उत्तरं लिखत । | 1×3=3 |
| ✻ | पञ्चषैः वाक्यैः संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत । | 1×3=3 |
| ✻ | संस्कृतभाषया अनुवादं कुरुत । | 1×3=3 |
| ✻ | आङ्ग्लभाषया, कर्णाटकभाषया वा अनुवादं कुरुत । | 1×3=3 |
| ✻ | पत्रं लिखत । | 1×3=3 |
| ✻ | प्रबन्धं लिखत । | 1×3=3 |

✻✻✻✻✻

@KTBS NOT TO BE REPUBLISHED

## आकरग्रन्थाः

१. सहवासः - सुगन्धः - संस्कृतभारती 'अक्षरं' बेङ्गलूरु

२. दिनचर्या - प्रथमदीक्षा - राष्ट्रियसंस्कृत-संस्थानम्

३. चतुरः कालिदासः - भोजप्रबन्धः

४. पण्डितभास्करः - वाणीवाहनः - डा. आर् गणेशः

५. तपोवनाभिगमनम् - कविकोपकलापः - डा. विश्वासः

**प्रथमः संस्कृतज्ञानपीठप्रशस्तिपुरस्कृतः डा. सत्यव्रतशास्त्री**
**- समग्रसाहित्यम् - 2009**



डा. सत्यव्रतशास्त्री

© NCERT TBS
NOT TO BE REPUBLISHED

# पाठयोजना

| मासाः | पाठाः |
|---|---|
| जून् | वर्णाः, दिनचर्या संख्याः च, सहवासः |
| जुलै | नीतिबोधः (कण्ठपाठः करणीयः), सुबन्ताः-१-६,आरोग्यभाग्यम्, भिक्षुकस्यस्वप्नः |
| आगस्ट् | जीवनसाफल्यम्, पत्रलेखनम्-१, तिङन्ताः- परस्मैपदी, प्रबन्धः१,२, |
| सेप्टेम्बर् | सुबन्ताः(७-१५), अनुवादः(१-४) अक्कमहादेवी, चतुरः कालिदासः |
| अक्टोबर् | गुर्वष्टकम्, (कण्ठपाठः करणीयः) |
| नवेम्बर् | सन्धिः, (१,२) दुराशाफलम्, पत्रलेखनम्-२, प्रहेलिकाः |
| डिसेम्बर् | सन्धिः(३,४,५) सिद्धभूमिः सिद्धगङ्गा, अनुवादः(५-८), समासः |
| जनवरि | पण्डितभास्करः, एकलव्यस्य गुरुभक्तिः, प्रबन्धः - (३, ४), तिङन्ताः- आत्मनेपदी, विशेषरूपाणि |
| फेब्रवरि | तपोवनाभिगमनम्, परमकारुणिकः महर्षिः, वाक्यरचना कौशलम् |
| मार्च् | प्रश्नोत्तरलेखनाभ्यासः, पुनरावर्तनम् |

©KTBS NOT TO BE REPUBLISHED

# NOTE

@KTBS
NOT TO BE REPUBLISHED